ISSN 2230-8962

वेदविद्या
VEDAVIDYĀ

मूल्याङ्कित अन्ताराष्ट्रिय शोध-पत्रिका
An International Refereed Research Journal

अङ्क : २३
Vol. XXIII

जनवरी-जून २०१४
January-June 2014

सम्पादक
प्रो. रूप किशोर शास्त्री

महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम् उज्जयिनी
(मानवससाधनविकासमन्त्रालयभारतसर्वकारस्याधीनम्)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ISSN 2230-8962

वेदविद्या

VEDA-VIDYĀ

मूल्याङ्कित-अन्ताराष्ट्रिय-शोध-पत्रिका
An International Refereed Research Journal

अङ्क : २३
Vol. XXIII

जनवरी-जून २०१४
January-June 2014

सम्पादक
प्रो. रूप किशोर शास्त्री
(सचिव)

महर्षि-सान्दीपनि-राष्ट्रिय-वेदविद्या-प्रतिष्ठान
(मानव संसाधन विकास मन्त्रालय, भारत सरकार के अधीन)
वेदविद्या मार्ग, चिन्तामण गणेश, पो.ऑ. - जवासिया, उज्जैन ४५६००६

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मुख्य-संरक्षक
श्रीमती स्मृति जुबेन ईरानी
(अध्यक्ष, महर्षि-सान्दीपनि-राष्ट्रिय-वेदविद्या-प्रतिष्ठान, तथा
मानव संसाधन विकास मन्त्री, भारत सरकार)

संरक्षक
प्रो. एस. सुदर्शन शर्मा
(उपाध्यक्ष, महर्षि-सान्दीपनि-राष्ट्रिय-वेदविद्या-प्रतिष्ठान)

सम्पादक
प्रो. रूप किशोर शास्त्री
(सचिव, महर्षि-सान्दीपनि-राष्ट्रिय-वेदविद्या-प्रतिष्ठान)

सहसम्पादक
डॉ. देवानन्द शुक्ल (कार्यक्रम अधिकारी)
डॉ. अनूपकुमार मिश्र (सहायक)

अक्षर संयोजक
किशोर कुमार अग्रवाल
श्रीमती मिताली रत्नपारखी

मूल्य
वार्षिक शुल्क २००/-

पत्राचार-सङ्केत
महर्षि-सान्दीपनि-राष्ट्रिय-वेदविद्या-प्रतिष्ठान
वेदविद्या मार्ग, चिन्तामण गणेश, पो.ऑ. - जवासिया, उज्जैन 456006
दूरभाष : (0734) 2502266, 2502254 तथा फैक्स : (0734) 2502253
e-mail : msrvvpujn@gmail.com, Website : msrvvp.nic.in

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विषयानुक्रमणिका

क्र.		पृष्ठ
	सम्पादकीय	i-iv
	संस्कृत-सम्भागः	
१.	**अथर्ववेदे प्राणिविज्ञानम्** – प्रो. राजेश्वर मिश्रः	०१
२.	**ऋग्वेदे वाचः प्रातिष्ठ्यम्** – डॉ. कामदेव झाः	१२
३.	**औपनिषदिकं भाषादर्शनम्** – डॉ. सन्तोष कुमार शुक्लः एवम् ठाकुर शिवलोचन शाण्डिल्यः	२२
४.	**यज्ञानां वैज्ञानिकता** – अशोक कुमार मिश्र	३३
५.	**वर्णानुक्रमेणोपनयनकालविमर्शस्तत्प्रयोजनञ्च** – डॉ. चूडामणिःत्रिवेदी	४१
६.	**वैदिकसंस्कृतवाङ्मये पर्यावरणम्** – डॉ. अनिल प्रताप गिरिः	५१
७.	**वैदकवाङ्मये शब्दतत्त्वचिन्तनम्** – दिनेशकुमारद्विवेदी	५७
८.	**वेदेषु व्रतविमर्शः** – लक्ष्मण पन्थी	६७
९.	**ऋग्वेदीयप्रथमसूक्तस्य सायणस्कन्दस्वामिभाष्ययोः काचित् सङ्क्षिप्ता तुलना** – पियोली पालः	७६
	हिन्दी-सम्भाग	
१०.	**अथर्ववेदीय वाङ्मय की श्रीवृद्धि में पाश्चात्यविद्वानों का योगदान** – प्रो. रूप किशोर शास्त्री	८२
११.	**अथर्ववेदोक्त इष्टापूर्त्तकर्मफल** – डॉ. सदानन्द त्रिपाठी	९०
१२.	**ऋग्वेद-शाखा-विमर्श** – डॉ. अमलधारी सिंह	१०४

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

१३. विधिवाक्यार्थ एवं विधि के विविध भेद
– प्रो. सोमनाथ नेने ११९
१४. वैदिकसाहित्य का जातककथाओं पर प्रभाव
– शारदा गौतम १३५
१५. शब्दोत्पत्ति-विमर्श
– प्रचेतस् शास्त्री १४३
१६. वैदिकसाहित्य में सौन्दर्य-अनुशीलन
– सन्त प्रकाश तिवारी १५०

English Section

18. Common Thread Between Science And Vedic Concepts
- Dr. S.R. Verma 166
19. Importance Of Animal – As Reflected In Veda
– Smt. Chaitali Kanjilal 185
20. Water, The Elixir Of Immortality Quotes From Veds And Purans
– Rahul Verma 190

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सम्पादकीयम्

प्रिय सुधिप्रवर पाठको ! वेदसंहिताओं में निहित वेदज्ञान को नैसर्गिक ज्ञान बताया गया है, जिसे परमात्मवाक् के रूप में भारतीय मनीषा ने आदिकाल से ही संस्थापित किया है, इसे स्वतः प्रमाण भी कहा गया है अर्थात् यह किसी के द्वारा प्रमाणित नहीं किया जा सकता अपितु इसी से प्रमाणित होकर अथवा कराकर अपनी-अपनी बात को दूसरों पर उचित या अनुचित रूप से स्थापित करना चाहते हैं, भले ही उन्होंने वेद संहिताएं अर्थसहित न पढ़ी अथवा चिन्तन न की हों । एक तरह से अपने विचार या मत को पुष्ट कराने के लिए वेद को प्रमाणस्वरूप प्रस्तुत करते, सुने एवं देखे जाते हैं। यह सही है कि वेद प्रमाणस्वरुप होने के कारण सभी के लिए मान्य एवं अन्तिम निर्णयात्मक होते हैं । यद्यपि प्राचीनकाल से ही शास्त्रार्थों, संवादों, प्रश्नोत्तरों एवं विचार प्रस्तुति को सशक्त एवं अन्तिम परिणति बनाने में महनीय भूमिका रही है, जिसका आज कुछ अज्ञानमय विकृत रूप इस समय टेलीविजन चैनलों पर अवतार एवं पूजा करने-कराने, मन्दिर बनाने को लेकर देखने एवं सुनने को मिल रहा है, जहाँ पर अनर्थक बहस में वेद मन्त्रों की दुहाई देकर अपनी-अपनी बात सिद्ध करना प्रदर्शित किया जा रहा है ।

इस प्रकार के प्रकरणों में स्वार्थवशात् वेदमन्त्रों की आड़ लेकर भ्रमित करना एक प्रकार से अज्ञानता ही नहीं वेदज्ञान के प्रति घनघोर अन्याय है । वे भूल जाते हैं कि वेदों में विशुद्ध परमात्म ज्ञान है । जिसमें ढ़ोंग, पाखण्ड, आडम्बर, गुरुडम, अवतारवाद अथवा पाषाणादि जड़ पदार्थ निर्मित प्रतिमापूजन को चारों वेदों में लेशमात्र भी नामोनिशान, उल्लेख अथवा विधान नहीं हैं, अपितु निषेध अवश्य है । यजुर्वेद में इस विषयक स्पष्ट व्यवस्था एवं ज्ञान स्वयं परमात्मवाणी में विद्यमान है - करें चिन्तन वेद के एक-एक शब्द पर -

न तस्य प्रतिमा अस्ति यस्य नाम महद्यशः ।
हिरण्यगर्भइत्येष मा मा हिꣳसीत्येषा यस्मान्न जातऽ इत्येषः ॥१॥
- यजु० अ० ३२ । मं० ३ ॥

स पर्य्यगाच्छुक्रमकायमव्रणमस्नाविरꣳ शुद्धमपापविद्धम् ।
कविर्मनीषी परिभूः स्वयम्भूर्याथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यः समाभ्य ॥२॥
- यजु० अ० ४० । मं० ८ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

'पूर्ण' ब्रह्म जो 'अज' है कभी जन्म नहीं लेता, और 'निराकार' जिसकी किसी प्रकार की मूर्ति नहीं, इत्यादि लक्षणयुक्त है, जिसकी आज्ञा का ठीक-ठीक पालन और उत्तम कीर्तियों के हेतु जो सत्यभाषणादि कर्म हैं, उनका करना ही जिसका 'नामस्मरण' कहाता है। (हिरण्यगर्भ०) जो परमेश्वर तेजवाले सूर्य्यादि लोकों की उत्पत्ति का कारण है, वह (यस्मान्न०) अर्थात् जो परमेश्वर किसी माता-पिता के संयोग से कभी न उत्पन्न हुआ, न होता है और न होगा, और न वह कभी शरीर धारण करके बालक जवान और वृद्ध होता है, (न तस्य०) उस परमेश्वर की 'प्रतिमा' अर्थात् नाप का साधन तथा प्रतिबिम्ब वा सदृश, अर्थात् जिसको तस्वीर कहते हैं, सो किसी प्रकार नहीं है । क्योंकि वह अमूर्त, अनन्त, सीमारहित, निराकार और सब में व्यापक है । इससे निराकार ही की उपासना सब मनुष्यों को करनी चहिये ॥ [१॥]

कदाचित् कोई शङ्का करे कि - शरीरधारी की उपासना करने में क्या दोष है ? तो यह बात समझनी चाहिये कि - जो प्रथम जन्म लेकर शरीर धारण करेगा, और फिर वह वृद्ध होकर मर जायेगा, तब किसकी पूजा करोगे ? इस प्रकार मूर्तिपूजन का निषेध वेद से सिद्ध हो गया ।

तथा (स पर्य्यगाच्छु०) - जो परमेश्वर (कविः) सबका जाननेवाला, (मनीषी) सबके मन का साक्षी, (परिभूः) सबके ऊपर विराजमान, और (स्वयंभूः) अनादिस्वरूप है, [याथात०] जो अपनी अनादिस्वरूप प्रजा को अन्तर्यामिरूप से और वेद के द्वारा सब व्यवहारों का उपदेश किया करता है, (स पर्य्यगात्) सो सब में व्यापक, (शुक्रम्) अत्यन्त पराक्रमवाला, (अकायम्) सब प्रकार के शरीर से रहित, (अव्रणम्) घाव आदि सब रोगों से रहित, (अस्नाविरम्) नाड़ी आदि के बन्धन से पृथक्, (शुद्धम्) सब दोषों से अलग, और (अपापविद्धम्) सब पापों से अनाबद्ध, इत्यादि लक्षणयुक्त परमात्मा है, वही सबको उपासना के योग्य है, ऐसा ही सबको मानना चाहिये ॥ [२॥]

जब हम वेद को परम प्रमाण मानते हैं तो उसमें निहित वेदज्ञान एवं वेदविद्या का सर्वथा अनुसरण करना चाहिए । **संश्रुतेन गमेमहि मा श्रुतेन विराधिषि** यह मन्त्रवाक्य वेद के अनुसार चलने एवं विपरीत आचरण एवं व्यवहार न करने का पवित्र सन्देश स्वयं देता है । मेरा यह मानना निश्चित है कि मात्र वेदज्ञान सम्मत सिद्धान्तों एवम् विद्याओं के पालन करने से भ्रम, सन्देह, अज्ञान, परस्पर विवाद, स्वतः ही ध्वस्त हो जाते हैं । इन दिनों तथाकथित किसी भी मतावम्बी परिवार में जन्मे अथवा रहे किसी व्यक्ति की पूजा या उसको अवतार व भगवान मानकर पूजन करने, मन्दिर बनाने, प्रतिमाओं को

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्थापित करने के साथ-साथ अन्य पूर्व से प्रचलित इस प्रकार की समस्त निर्मूल अवैदिक धारणाओं का पटाक्षेप वेदार्थ को समझने एवं उसके अनुपालन से हो जायेगा । दुःखमयी विडम्बना को तो देखिए - दुहाई, सहारा, नाम तो वेद का लेते है, परन्तु धारणाएं एवं व्यवहार सब अवैदिक हैं ।

उत त्वः पश्यन्नददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनाम् ।
उतो त्वस्मै तन्वं विसस्रे जायेव पत्या उशती सुवासाः ॥ ऋग्वेद १०-७१-३

ऋग्वेद के इस मन्त्र का कहना है कि अज्ञानी लोग देखते हुए नहीं देख पाते, सुनते हुए भी श्रवण नहीं कर पाते । जो उस परमात्मा की अमृत वाणी वेदमन्त्रों के रहस्यों को समझता है उसके लिए जैसे सुशोभिता पत्नी अपने समस्त स्वरूप को पति के समक्ष उद् घाटित कर देती है कुछ भी छिपा हुआ नहीं होता, वैसे ही वाक् अपने वास्तविक ज्ञानस्वरूप अमरत्व को उद्घाटित कर देती है ।

इस तरह ऐसे अज्ञानी लोगों को वेद ने नितान्त अज्ञानी ही माना है, भले ही वह कितने भी बड़े धार्मिक का आध्यात्मिक पद पर आसीन हों अथवा कितनी भी विश्व प्रसिद्ध मिथ्या एवं भ्रमात्मक मान्यता में जी रहे हों, वे अपने समस्त अनुयायी अन्धभक्तों सहित घनघोर अन्धकार में डूबे पड़े हैं । न तो वह सज्ज्ञानी गुरु है और ना ही वह भगवान् का अवतार। **गुरु लोभी चेला लालची दोनों खेलें दाव । भवसागर में डूबते बैठ पत्थर की नाव ॥** तथाकथित मिथ्या गुरु, भगवान या अवतार यश एवं धन का लोभी है और अनुयायी शिष्य स्वार्थी । न तो वह तथाकथित भगवान और ना ही वह तथाकथित अनुयायी भक्त । अनुयायी भक्त या पूजक सदाबहार मँगता है, वह अपनी प्रार्थना में माँगता है अपने लिए धन, पुत्र-पुत्री, अदालती विजय, नौकरी, कार, कोठी, पद, बैंक बैलेन्स अथवा किसी रोग का निवारण । क्योंकि पुरुषार्थ चतुष्टय में प्रथम तीन तत्वों - धर्म, अर्थ, काम का कर्ता अथवा अधिपति स्वयं मनुष्य है, जिसे संसार में रहकर कार्य करने होते हैं लेकिन जहाँ तक मोक्ष की बात आती है, उसमें तो शुद्ध अन्तःकरण, निर्लोभ, निष्काम आचरण एवं सद् व्यक्तित्व की ही आवश्यकता होती है, वह स्वयं आत्मचिन्तन करके देखले निष्पक्ष एव दुराग्रह रहित होकर, उसे तत्काल पता चल जायेगा कि वास्तव में मैं अज्ञानी हूँ मूँढ हूँ, लक्ष्य विहीन हूँ और नश्वर चीजों का मात्र सदाबहार मँगता या भिखारी हूँ ।

आपके हस्तगत इस वेदविद्या के अङ्क में वेदज्ञान विषयक अत्यन्त महत्वपूर्ण लेख प्रकाशित हैं, वेदज्ञान के विविध बिन्दुओं, पहलुओं एवं विषयों पर प्रतिष्ठान द्वारा

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रकाशित यह शोध-पत्रिका विश्व में एक मात्र ऐसा रिसर्च जर्नल है जो वेदविद्या का वस्तुतः प्रतिनिधित्व करता है। जिन वेदज्ञान मनीषियों के मूल्याङ्कित लेखों को इस शोध-पत्रिका में स्थान मिल पाया है निश्चय ही ये शोध लेख आपके चिन्तन एवम् मनन की सुतराम अपेक्षा रखते हैं। सम्पूर्णतया एतद्विषयक गुणवत्ता एवं स्तर बनाये रखना हमारा प्रथम उद्देश्य है, यही कारण है इसकी प्रतिष्ठा में नित्यशः वृद्धि हुई है। प्रमाणपुरस्सर शोधपरक लेखों का आपके द्वारा अध्ययन हो और उनका आपको ज्ञानिक लाभ भी मिले, यही हमारा एकीकृत लक्ष्य है, इस लक्ष्य की प्रगति में उन समस्त शोध लेखों के लेखकों को बधाई देता हूँ अभिनन्दन करता हूँ, जिन्होंने पाठकों, शोधार्थियों, मनीषियों एवं विद्वानों के शोध चिन्तन एवं ज्ञानवृद्धि में वैभव प्रदान करने में अपना अप्रतिम योगदान दिया है ।

प्रो. रूप किशोर शास्त्री
सचिव
महर्षि सान्दीपनि राष्ट्रीय वेदविद्या प्रतिष्ठान,
वेदविद्या मार्ग, चिन्तामण गणेश, उज्जैन

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अङ्क-२३
जनवरी-जून २०१४

वेदविद्या
ISSN-2230-8962

अथर्ववेदे प्राणिविज्ञानम्

प्रो. राजेश्वर मिश्रः

सर्वविधानां ज्ञानविज्ञानानामाकरो वेद इति सुविदितमेव । भारतीयैः वैदेशिकैश्च विद्वद्भिर्वेदा एव सर्वविद्यानां स्रोतांसि स्वीक्रियन्ते । सामाजिकाध्यात्मिक-विषयेभ्योऽतिरिक्तं वेदेषु - कृषि - जीव - शिल्प - ज्योतिष - भौतिक - रसायन - वनस्पत्यादिविज्ञानविषयिणी सामग्री अप्युपलभ्यते । शान्तिपौष्टिकाभिचारादिकर्म-प्रतिपादकत्वादैहिकामुष्मिकफलप्रदोऽथर्ववेदो वेदेषु सर्वेषु महत्त्वपूर्णं स्थानं भजते । अथर्ववेदभाष्योपोद्घाते वेदभाष्यकार आचार्यसायणोऽपि वेदस्यास्य महत्त्वं स्वीकरोति [१] बहुविषयैः समन्वितेऽथर्ववेदे प्राणिविज्ञानविषयेऽपि प्रभूतं विवरणं प्राप्यते। वेदेऽस्मिन् बहुविधानां जीवानां नामानि गुण-कर्म-प्रकृत्यादिदृष्ट्या तेषां वर्गीकरणं जीवानां चिकित्सा-संरक्षण-संवर्धनोपयोगितविषयेष्वपि तद्विषयकानि महत्त्वपूर्णानि तथ्यान्युद्घाटितानि सन्ति । तेषां विवेचनमत्रापेक्षितं वर्तते ।

अथर्ववेदे जीवानामनेकविधं वर्गीकरणं दृश्यते । कुत्रचिद् ग्राम्यारण्यपशूना-मुल्लेखः प्राप्यते ।[२] वर्गीकरणमेतद् काठक-मैत्रायणीसंहितयोरपि कृतं वर्तते ।[३] परं खगानां गणना पशुवर्गे कुर्वन् कुत्रचित्तु ग्राम्यारण्यवायव्यपशुरूपेण तेषां परिगणना कृतोपलभ्यते।[४] ऋग्वेदे यजुर्वेदे चैते त्रिविधाः पशव उल्लिखिताः।[५] ग्राम्ये भवा

---

[१] अथर्वभाष्ये, उपोद्घाते श्लोक : १० व्याख्याय वेदत्रितयमामुष्मिकफलप्रदम् ।
ऐहिकामुष्मिकफलं चतुर्थं व्याचिकीर्षति ॥

[२] अथर्व, ३.३१.३ : वि ग्राम्याः पशवं आरण्यैर्व्यापस्तृष्णायासरन् ।

[३] काठ.सं. १३.१२.; मैत्रा. सं. २.२.३; ३.९.७

[४] अथर्व. १९.६.१४ : पशूँस्तांश्चक्रे वायव्यानारण्या ग्राम्याश्च ये ।

[५] ऋ., १०.९०.८; यजु. ३१.६

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गवादयः पशवः सर्वरूपान्विता विविधरूपाश्च बहुधा सन्तोऽप्यथर्ववेद एकरूपा उच्यन्ते।[६] वस्तुत वर्ण-रूप-आकृतिभेदैश्च पशवो विविधाः सन्ति परं पशुत्वजातिदृशां अथ च कार्य-व्यवहारदृशा त एकरूपाः स्वीक्रियन्ते । सम्भवतोऽत्रर्षीणामेष एवाभिप्रायः । अथर्ववेदे ग्राम्यपशूनां सङ्ख्यैकत्र पञ्चोल्लिखिता-गवाश्वाजाविपुरुषा इति।[७] परमन्यत्र तेषां सप्त सङ्ख्या परिकीर्तिता ।[८] आचार्यसायणस्य मते ते गवाश्वाजाविपुरुषगर्दभोष्ट्राख्याः सन्ति ।[९] यजुर्वेदस्य काठक-तैत्तिरीय-मैत्रायणी-माध्यन्दिनसंहितासु शतपथब्राह्मणे च पञ्चग्राम्यपशवः स्वीकृताः।[१०] शतपथ-ब्राह्मणेऽन्यत्र सप्त ग्राम्याः सप्तारण्याः पशवो मताः ।[११] अथर्ववेदे कुत्रचित्तु पार्थिवाः दिव्याः जीवा उल्लिखिताः । निवासस्थानभेदात् पुनस्तेषां भेदद्वयं कृतम्- ग्राम्या आरण्याश्च । सपक्षत्वादपक्षत्वाच्च पुनश्चैतेषां विभागद्वयं विहितमपक्षाः पक्षवन्तश्च ।[१२] अन्यत्र च शरीरसंरचनादृशा तेषां जीवानां विभाजनमृषिभिर्द्विपाद्-चतुष्पाद्-उभयादतः पशव इति कृतम् ।[१३] वेदेऽस्मिन्नुल्लिखितानां जीवजन्तूनां विवेचनं जीवविज्ञानदृशा षड्वर्गेषु कर्तुं शक्यते - (१) जलीया जन्तवः, (२) सरीसृपाः जन्तवः, (३) पक्षिणः, (४) स्तनधारिजन्तवः, (५) वन्यजन्तवः (६) कीटाश्च कृमयश्च ।

अथर्ववेदे स्थले-स्थले जष (झषमत्स्यविशेषः)- मत्स्य[१४] - नक्र - कूर्म[१५] -

---

[६] अथर्व. २.३४.४ : ये ग्राम्याः पशवो विश्वरूपा विरूपाः सन्तो हुधैकरूपाः ।
[७] अथर्व, ११.२.९ : पञ्च पशवो विभक्ता गावो अश्वाः पुरुषा अजावयः ।
[८] तदेव, ३.१०.६ : ये ग्राम्याः पशवो विश्वरूपास्तेषां सप्तानां मयि रन्तिरस्तु ।
[९] तत्रैव सायणभाष्यम् : ग्रामे भवा गोश्वाजाविपुरुषगर्दभोष्ट्राख्याः....।
[१०] द्रष्टव्यः काठ.सं.१६.१७; तैत्ति.सं.४.२.१०.१-४; मैत्रा.सं.२.७.१७;वाज.सं.१३.४७-५१, शत.ब्रा.६.२.१२.।
[११] शत.ब्रा. ३.८.४.१६ : सप्त ग्राम्याः पशवः सप्तारण्याः ।
[१२] अथर्व., ११.७(५). २१ : पार्थिवा दिव्याः पशव आरण्या ग्राम्याश्च ये ।
[१३] तदेव. २.३४.१ : पशूनां चतुष्पदामुत यो द्विपदाम् ; तदेव, १९.६.१२ : उभयादतः।
[१४] तदेव, ११.२.२५ जषा मत्स्या रजसा.....।
[१५] तदेव, ९.४.१६ : ते कुष्ठिकाः सुरमायै कूर्मेभ्यो अदधुः शफान् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मण्डूक[१६] शकुल (मत्स्यविशेषः)[१७] - शिंशुमार (शिशुमार शोंइस इति भाषायाम्) - अजगर - पुरीकयादयो[१८] जलीयजन्तव उल्लिखिताः । एतेषु जलचरेषु शिंशुमारः समुद्रस्य, मण्डूकः पर्जन्यस्य, मत्स्यो जलस्य, नक्रश्च गह्वरजलस्य संसूचकाः मन्यन्ते।[१९] भूमौ सरणशीलाः सर्पादयो जन्तवः सरीसृपा उच्यन्ते । वेदेऽस्मिन् निवासस्थानस्वरूपप्रकृत्यादिकारणादष्टादशसर्पजातीनामुल्लेखो नाममिः कृतः येन ताः ज्ञात्वा जना आत्मानं रक्षितुं समर्थाः स्युः । एते सर्पाः सन्ति - कैरातः (यत्र किरातजातिः निवसति तस्मिन् वने वास्तव्यः सर्पः), पृश्निः (चित्रलः सर्पः), उपतृण्यः (तृणेषु गूढः), बभ्रुः (बभ्रवर्णः सर्पः), वैमातः (जलीयस्थानेषु वास्तव्यः सर्पः), अपोदकः (मरुभूमौ वास्तव्यः सर्पः), सत्रासाहः (आक्रामकः सर्पः), मन्युः (क्रोधी सर्पः), आलिगी (शरीरे अवलग्यमाना सर्पिणी), विलगी (शरीरं नावलग्यमाना सर्पिणी), उरुगूला (विशालपुच्छधारिणी सर्पिणी), असिक्की (कृष्णवर्णा सर्पिणी), दद्रुषी (यस्या दंशनेन गात्रे दद्रुरुद्भवति), कर्णा (कर्णावती सर्पिणी), श्वावित् (सर्पविशेषः), खनित्रिमा च (भूमौ विवरं निर्मीय निवसमाना सर्पिणी)[२०] ।

एतस्माद्यतिरिक्ताः बहवोऽन्ये सरीसृपाः सर्पविशेषाश्चोल्लिखिताः । सर्प[२१] - अहि[२२] - स्वज[२३] (स्वयमेवोत्पन्नः सर्पः) - श्वित्र (श्वेतवर्णः सर्पः) - पृदाकु (कुत्सित - शब्दकारी सर्पः)[२४] - कसर्णील - दशोनसि[२५] (दशस्थानेषूर्ध्वगतः सर्पविशेषः)-

---

[१६] तदेव ७.१२१ (११६).२ : मण्डूर्कमभ्येऽत्वव्रतः.....।
[१७] तदेव २०.१३६.१ : ..... शंकुलाविव....।
[१८] तदेव ११.२.२५ : शिंशुमारा अजगराः पुरीकया....।
[१९] यजु. २४.२१ : समुद्राय शिशुमारान्.....।
[२०] अथर्व. ५.१३.५-९ ।
[२१] तदेव १२.१.४६ ।
[२२] तदेव ६.६७.२ ।
[२३] तदेव ३.२७.४ : उदीची दिक् सोमोधिपतिः स्वजो रक्षिता...; १०.४.१७
[२४] तदेव, ३.३७.३, ६ ; १०.४.१७ ।
[२५] तदेव १०.४.१७ : स्वजं तिरश्चिराजिं कसर्णीलं दशोनसिम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तृष्टधूम[२६] (परोपद्रवकारि विषज्वालायुक्तः सर्पः) - तृष्टदंश्मा[२७] (तीक्ष्णदंशनकर्मयुक्तः सर्पः) - तिरश्चिराजि (तिर्यगावलययुक्तः सर्पविशेषः) - कल्माषग्रीव[२८] (कृष्णवर्णा ग्रीवा यस्य स सर्पविशेषः) - इत्यादयः सर्पविशेषाश्चाप्युल्लिखिताः । अत्र पैद्व[२९] - वृश्चिक[३०] नामभ्यामन्ययोः सरीसृपयोः सङ्केतोऽपि प्राप्तः । सर्पदंशनप्रकारोऽपि वेदेऽस्मिन् सङ्केतितः । सर्पदंशने यत्र दन्तक्षतं गहनं भवति तत् खातमित्युच्यते, यत्र दन्तक्षतमल्पं भवति तदखातमथ च यत्र सर्पसङ्घट्टनं भवति तत् सक्तमिति कथ्यते ।[३१] चरकसंहितायामेतेषां कृते क्रमशः सर्पितः रदितः सर्पाङ्गाभिहत इति सञ्ज्ञाः प्रदत्ताः।[३२] कतिपयसरीसृपाणां मारणविधिरप्यथर्ववेदे निर्दिष्टा । तदनुसारं दंशनार्थमभ्यागतं वृश्चिकं घनेनाहिञ्च दण्डेन हन्यात् ।[३३]

अथर्ववैदिका ऋषयः शकुनिविज्ञानेऽपि निष्णाता आसन् । अथर्ववेद उल्लिखितानां पक्षिणामवलोकनेनेदं स्वयमेव प्रमाणितं भवति । तत्र हंसः, द्विपाद्, नीलपृष्ठः इत्येते पक्षिविशेषाः स्वीकृताः ।[३४] हंसो विषनिवारकमोषधिमपि जानाति।[३५] एष अद्यः सोममपि पृथक्कर्त्तुं समर्थः ।[३६] शोभनपक्षो वैनतेयोऽप्यत्र 'सुपर्ण'- इति शब्देनोक्तः। अत्रास्य वैशिष्ट्यमप्युद्घाटितम् । तदनुसारमन्यप्राणिघातकं विषमस्य

---

[२६] तदेव १९.४७.८ : अधं रात्रि तृष्टधूममशीर्षाणमहिम् ।
[२७] तदेव, १२.१.४६
[२८] तदेव ३.२७.२, ५; १०.४.१७
[२९] तदेव, १०.४.५.-७
[३०] तदेव, १२.१.४६ : यस्ते सर्पो वृश्चिकस्तृष्टदंश्मा..... ।
[३१] तदेव ५.१३.१ : खातमखातमुत सक्तमग्रभमिरेव धन्वन्नि जंजास ते विषम् ।
[३२] द्रष्टव्यः चरक०, चिकित्सास्थानम्, अध्यायः २३. ।
[३३] अथर्व. १०.४.९ : घनेन हन्मि वृश्चिकमहिं दण्डेनागतम् ।
[३४] अथर्व., १२.१.५१ : यां द्विपादः पक्षिणः सम्पतन्ति हंसाः सुपर्णाः ; ऋ. ७.५९.७
[३५] तदेव ८.७.२४ : वयांसि हंसा या विदुर्याश्च सर्वेप तत्रिणः ।
[३६] यजु. १९.७४; काठ. सं. ३८.१ ; मैत्रा. सं. २.११६.; तैत्ति० ब्रा०, २.६.२.१

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कृतेऽन्नवज्जीर्णं भवति ।[३७] एषः 'पाठा' नामौषधेर्ज्ञाताप्युच्यते ।[३८] अस्य वासः पर्वतेषु भवतीति तात्कालिक ऋषिः जानाति स्म ।[३९] मयूरमयूर्योरुल्लेखोऽपि प्राप्यते । शोभनपक्षत्वात् मयूरः प्रशंसनीयोऽस्ति ।[४०] मयूरः मयूरी च सर्पं विशेषेण छेत्तुं समर्थावित्यपि निर्दिष्टम् ।[४१] अथ चाममांसभक्षकस्य गृध्रस्य,[४२] पापनाशकस्य शकुन्तस्य[४३], शुभसूचकस्य शकुनस्य[४४], दिव्यौषधिज्ञस्य रघटपक्षिविशेषस्य[४५], काकस्य[४६], अशुभसङ्केतकयोः कपोतोलूकयोः[४७], चक्रवाकयुगलस्य[४८], कृकवाकस्य (कुक्कुटस्य)[४९], कुरीरिणः[५०], जत्वस्य (वाग्गुद इत्यस्य च)[५१] पक्षिविशेषस्योल्लेखः प्राप्यते ।

वेदत्रयेषु (ऋग्यजुरथर्ववेदेषु) स्तनधारिपशूनां जन्तूनां वा विवरणं प्रायशः प्राप्यते । एते पशवः द्विविधाः - द्विपादाश्चतुष्पादाश्च[५२]; मनुष्याः द्विपादाः जन्तवोऽन्ये च चतुष्पादा इति । पुनश्च स्थानभेदादेते पशवो वर्गद्वये विभक्ताः - ग्राम्या आरण्याश्च (वन्यपशवः) । ग्रामे नगरे वा भवाः पशवो ग्राम्याः कथ्यन्ते । एतेषु श्व[५३] -हस्ति-

---

[३७] अथर्व., ४.६.३., सुपर्णस्त्वा गरुत्मान् विषे प्रथममावयत ।
[३८] तदेव, २.२७.२ : सुपर्णस्त्वान्वविन्दत.....।
[३९] तदेव ५.४.२ : सुपर्णसुवने गिरौ जातं हिमवतस्परि।
[४०] तदेव, ७.१२२ (११७) .१
[४१] तदेव ७.५८ (५६) .७ : अदन्ति त्वा पिपीलिका वि वृश्चन्ति मयूर्यः ।
[४२] तदेव, ११.१२ (१०) ८ : आमामादो गृध्राः कुर्णपे - ; ११.२.२; ११.१२ (१०). २४. ।
[४३] तदेव, ११.८ (६).८ : शकुन्तान् पक्षिणो....।
[४४] तदेव, ११.२.२४ : हंसाः सुपर्णाः शकुना वयांसि; १२.१.५१; तुल. ऋ. २.४२।
[४५] तदेव, ८.७.२४ :..... या रघटो विदुः...।
[४६] तदेव, ११.११ (९) ९ : ध्वाङ्क्षाः शकुनयस्तृप्यन्तु...।
[४७] तदेव, ६.२९.२ : कपोतोलूकाभ्यामपदं तदस्तु ; २०.४५.१; २०.१३५.११ ।
[४८] तदेव, १४.२.६४ : इहेमाविन्द्र सं नुद चक्रवाकेव दम्पती ।
[४९] तदेव, ५.३१.२ ; २०.१३६.१० ।
[५०] तदेव, ५.३१.२ :.... यां कुरीरिणि....।
[५१] तदेव, ९.२.२२ : यावतीर्भृङ्गा जत्वः कुरूरवो - यजु. २४.२५, मैत्रा. सं., ३.१४.६.।
[५२] तदेव, ६.१०७. १-४ : त्रायमाणे द्विपाच्च सर्व नो रक्ष चतुष्पाद् - ।
[५३] अथर्व. ४.३६.६ ; ७.९५.२; १८.२.११; ४.३७.११ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(वारि)[५४] - वाजि[५५] - मेष[५६] - कपि[५७] - हस्तिनी[५८] - नकुल[५९] - अजाजावि[६०] - गर्दभ-गर्दभी[६१] - अश्वतराश्वतरी[६२] शवभक्षिक्रोष्टादयः[६३] प्रमुखाः सन्ति; तेषामुल्लेखोऽथर्ववेदे कृतः । ग्राम्यपशुषु गवामृषभाणाञ्च महत्त्वपूर्णं स्थानमासीत् । गावोऽहन्तव्याः सौभाग्यसूचिकाश्च मन्यन्ते स्म । [६४] निस्तेजसः तेजोयुक्तान् विधातुं पयाज्यादिपदार्थानां सम्प्रदाने समर्थत्वाद् गोः अङ्गेषु देवस्थानं स्वीकृत्यासां (गवाम्) विश्वरूपता अङ्गीकृता ।[६५] अत एव ताः (गावः) मातृपदे प्रतिष्ठिताः।[६६] एवञ्चर्षभाः कृषिकार्ये उपयोगिनः सन्ति । एतदर्थमेते वध्रिकर्मणा निर्वीयाः प्रजननाशक्ताश्च करणीया इति निर्दिष्टम्।[६७] देवानामंशावतारत्वादेते दिव्यशक्तिसम्पना अपि मताः ।[६८]

अथर्ववेदे कतिपयवन्यजीवानामपि चर्चा कृतोपलभ्यते । वन्यजीवा अपि वर्गद्वये विभक्ताः । पुरुषादः नरभक्षिणो वा सिंहव्याघ्रादयः तृणभक्षिणः मृगादयश्च ।[६९]

---

[५४] तदेव, २०.५३.२ ; ६.७०.२ ।
[५५] तदेव, ६.९२.१-३; २.३०.५; ८.२.२५ आदि ।
[५६] तदेव, ६.४९.२ : मेष इव सं-- ; ४.४.८. ।
[५७] तदेव, ४.३७.११ ।
[५८] तदेव, २०.५३.२; ६.७०.२. ।
[५९] तदेव, ६.१३९.५; ६.७०.२ ।
[६०] तदेव. ४.१४.१; ६.७०.२ ।
[६१] तदेव, २०.७४.५; १०.१.१४ ।
[६२] तदेव, ४.४.८; ८.८.२२ ।
[६३] तदेव, ११.२.११ ।
[६४] तदेव, ७.७७ (७३).८ : पयो अघ्न्येयं सा वर्धतां महते सौभगाय ।
[६५] तदेव, ९.१२ (७) १-२६; ९.१२ (७) २५ : एतद्वै विश्वरूपं सर्वरूपं गोरूपम् ।
[६६] तदेव, १०.१०.१८ : वशा माता राजन्यस्य वशा माता स्वधे तव ।
[६७] तदेव, ३.९.२ : कृणोमि वध्रि विष्कन्धं मुष्कावर्हो गवामिव; ६.१३८.३ ।
[६८] तदेव ९.४.५ : देवानां भाग उपनाह - ; ९.४.११,१५ ।
[६९] तदेव, १२.१.४९ ; ये त आरण्याः पशवो मृगा वने हिताः सिंहाः व्याघ्राः पुरुषादश्चरन्ति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वेदेऽस्मिन् सिंह[७०]- व्याघ्र[७१] - द्वीपि[७२] - वृक[७३] - मृग[७४] - ऋक्ष[७५] - उल[७६] - श्वापद[७७] - सूकरादयो[७८] वन्यजीवाः प्रामुख्येन चर्चिताः ।

तदानीन्तनैर्ऋषिभिः कृमीणां कीटानाञ्च निर्देशोऽप्यस्मिन् वेदे कृतः । तेषां वर्गीकरणमतिसूक्ष्मं प्रतीयते । दृष्टादृष्टभेदात् स्थानभेदाच्च कृमयः पञ्चविधाः मताः । ते सन्ति - दृष्टाः, अदृष्टाः, भूमौ सर्पमाणाः कुरूरवाः, विष्टरादिषु तिष्ठन्तोऽल्गण्डवः, तीव्रगामिनः शलुनाश्च। [७९] गुणदृष्ट्या पुनस्ते द्विविधाः परिकीर्तिताः - दुर्णामाः सुनामाश्च। [८०] रोगोत्पादकाः कृमयो दुर्णामाः कथ्यन्ते पोषकाश्च शरीरस्य पुष्टिकारकाश्च कृमयः सुनामा उच्यन्ते । कतिपये कृमयो लोमयुक्ताः मताः[८१] कतिपये चानेकवर्णाः ।[८२] अथर्ववेदे कोक- शर्कु - कष्कष- येवाष- आश्रेष- प्रमीलि - पलीजक- ऋक्षग्रीव- वव्रिवास- मलिम्लुचादयः कृमयः प्रामुख्येन परिगणिताः।[८३] कृमीणामुत्पत्तिस्थानमप्यत्र सङ्केतितम् । जल- पशु- वन- पर्वतौषधि- वनस्पत्यादीनि तेषामुद्भवस्थानानि मतानि।[८४] रोगकृमयः शरीरस्य केषु-केषु भागेषु प्रच्छन्नरूपेण

---

[७०] तदेव, ५.२०.१ ; ८.५.१२; १२.१.४९ आदि ।
[७१] तदेव, ४.३.१ ; ४.८.४ ; ८.५.११ ; १२.१.४९ आदि ।
[७२] अथर्व., ४.८.७ : द्वीपिनमुप्स्वन्तः ; ६.३८.२ ; १२.४९.४ ।
[७३] तदेव, ४.३.१ : - व्याघ्रः पुरुषो वृकः ; ५.८.४ ; ६.३७.१ ; १२.१.४९ ।
[७४] तदेव, ४.३.६ : मूर्णा मृगस्य दन्ता...; ७.२६.२ ।
[७५] तदेव, १२.१.४९ : ऋक्षीकां रक्षो अप बाधयास्मत् ।
[७६] तदेव, १२.१.४९ : उलं वृकं पृथिवि.....।
[७७] तदेव, ८.५.११ - : श्वपदामिव....; १८.३.५५.... श्वापदः ।
[७८] तदेव, २.२७.२ : सूकरस्त्वाखनन्नसा-; २०.३५.७ : वराहम् ।
[७९] तदेव, २.३१.२ : दृष्टमदृष्टमतृहमथौ कुरूरुमतृहम् ।
अल्गण्डूनत्सर्वान्छलुनान् क्रिमीन् वचसा जम्भयामसि ।
[८०] तदेव, ८.६.४ --- दुर्णामा च सुनामा चोभा ।
[८१] तदेव, ८.६.२३ ।
[८२] तदेव, ५.२३.४-५ ।
[८३] तदेव, ५.२३.७-८ ; ८.६.२ :- शर्कुं कोकं मलिम्लुचं पलीजकम् ।
आश्रेषं वव्रिवाससमृक्षग्रीवं प्रमीलिनम् ॥
[८४] तदेव, २.३१.५ : ये क्रिमयः पर्वतेषु वनेष्वोषधीषु पशुष्वप्स्वन्तः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तिष्ठन्त्येतदप्यत्र निर्दिष्टम् । एते रोगकृमय आन्त्रेषु, शिरस्यान्तर्भागेषु पार्ष्णिषु च प्रच्छन्नरूपेण वर्तमाना उपदिष्टाः।[८५] एतदव्यतिरिक्तमक्षि - नासा- दन्तादिषु स्थानेषु च रोगकृमयः प्रविष्टाः मन्यन्ते ।[८६] सूक्ष्मदर्शीयन्त्रादीनामभावेऽपि ऋषिभिः कृतेन कृमीनां वर्गीकरणेन देहेषु तेषां गुप्ताधिष्ठानानां ज्ञानेन च स्फुटं प्रतिभाति यदस्मिन्विषये ऋषीणां सूक्ष्मातिसूक्ष्मं ज्ञानमासीत् ।

कीटानां विषयेऽप्याथर्वणिकानामृषीणां ज्ञानं सम्यगासीत् । ते कृमिकीटयोर्विभेदानपि जानन्ति स्म । तत्र भृङ्ग- जतू- वघा (विषधरः, अन्नभक्षकश्च कीटविशेषः) - कुरूरु[८७] - अलिंश - वत्सप[८८] मकक[८९] (मत्सर इति यावत्) - खलज (खले भवः कीटविशेषः)- उरुण्ड- मद्गट[९०] - द्यास्य (उभयोर्पक्षयोर्मुखयुक्तः) - चतुरक्ष - पञ्चपाद[९१] (पञ्चपादयुक्तः कीटविशेषः) - शकधूमज[९२] (गोमयादुत्पन्नकीटः) इत्यादीनां कीटविशेषाणामपि निर्देशः कृतः । अपि च मक्षिका- पिपीलिकयोर्गणनाऽपि कीटेषु कृतोपलभ्यते ।[९३] पिपीलिकाः सर्पमप्यत्तुं समर्था इत्यथर्ववेदीयानां मन्तव्यमस्ति।[९४] कतिपये कृषिविनाशकाः जीवाः कीटाश्चात्र चर्चिता ये धान्यं विनाशयन्ति । एषु जभ्याखुतर्दपतङ्गमचटी (टिड्डी) इति भाषायाम् - व्यद्वर - तर्दापति - वघापति -

---

[८५] तदेव २.३१.४ : अन्वाञ्च्यं शीर्षण्यमथो पार्ष्ट्यं क्रिमीन्...।
[८६] तदेव, ५.२३.३ : यो अक्ष्यौ परिसर्पति यो नासे परिसर्पति ।
दतां यो मध्यं गच्छति तं क्रिमिं जम्भयामसि ॥
[८७] अथर्व. ९.२.२२ : यावतीर्भृङ्गा जत्वः कुरूरवो यावतीर्वघा वृक्षसर्प्यो ।
[८८] तदेव, ८.६.१ : दुर्णामा तत्र मा गृधदलिंश उत वत्सपः ।
[८९] तदेव ८.६.१२ : ..... मकंकान् नाशयामसि ।
[९०] तदेव, ८.६.१५ : खलजाः शकधूमजा उरुण्डा ये च मद्गटाः ।
[९१] तदेव, ८.६.२२ द्यास्याच्चतुरक्षात् पञ्चपादादनङ्गुरे...।
[९२] तदेव, ८.६.१५ - द्रष्टव्य उपरि उद्धृतः मन्त्रः ।
[९३] तदेव, ७.५८ (५६) ७ : अदन्ति त्वा पिपीलिका ; ११.२.२ मक्षिकास्ते...।
[९४] तदेव, ७.५८ (५६).७ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तृष्टम्भोपकसादयः प्रमुखाः सन्ति ।[९५] अनेन प्रतीयते यत्ते कीटादिविषये विशेषेण जानन्ति स्म ।

वेदेऽस्मिन् पशूनां जीवानां वा सूक्ष्मनिरीक्षणं कृत्वैव वैदिकैर्ऋषिभिः तेषां गुणकर्मस्वभावानामपि निरूपणं कृतम् । तेषां मते वर्चस्- तेजो- यशः- पयो- भग- रसादिगुणाः गोषु वर्तन्ते ।[९६] ऋषभा दिव्यशक्तियुक्ता मताः ।[९७] पशूनां घ्राणशक्तिः प्रकृष्टा भवति यया ते भक्ष्याभक्ष्यं परिज्ञातुं समर्थाः ।[९८] एवमेव मयूराः मयूर्यश्च सर्पान् विशेषेण छेत्तुं क्षमाः ; तेषां विषचूषणेऽपि समर्थाः ।[९९] उलूकस्य ध्वनिः श्रवणकटुरशोभनश्च भवति, कपोतस्य च गृहे निवासोऽशुभो भवति।[१००] उलूको रात्रौ जागर्ति उड्डीयति च ।[१०१] उष्ट्रो भारं वोढुं क्षमः, हंसो रोगविषनाशकानामोषधीनां ज्ञाता, मैत्रीकरणे प्रवीणः, मधुरभाषी च मन्यते ।[१०२] सर्वे पक्षिणः पशवश्च विशेषतः- गो- ऽवि- सर्पाजा - नकुल - सूकरादयः सर्वे रोगनाशकविषनाशकौषधीनां ज्ञातारः मताः ।[१०३] यद् विषं समेषां जीवानां घातकं भवति तदेव सर्पाणां भोजनं जीवनञ्चेति प्रतिपादितम् ।[१०४] अथर्ववेदे नकुलस्यैतद् वैशिष्ट्यमुक्तं वर्तते यदसौ सर्पं विच्छिद्य पुनस्तं संयोजयितुं क्षमः ।[१०५] कपोतः कामी पक्षी इति मतः[१०६], पक्वपीलुफलानि श्यामाकञ्चास्य प्रियं भोज्यमित्युक्तम्।[१०७] हस्ती केन प्रकारेण प्रेमप्रदर्शनं करोति

---

[९५] तदेव, ६.५० १-३ ; तुल. छान्दो. उप. १.१०.१ ।
[९६] तदेव, १४.२.५३-५८ ।
[९७] तदेव, ९.४.५, ११,१५ ।
[९८] शत. ब्रा., ११.८.३.१० : यदैवोपजिघ्रन्ति अथ जानन्ति ।
[९९] अथर्व, ७.५८ (५६). ७ : वि वृश्चन्ति मयूर्यः ; तुल. ऋ. १.१९१.१४ ।
[१००] तदेव, ६.२९. १-३ ।
[१०१] तदेव, ८.४.१७-१८ ।
[१०२] अथर्व, ८.७.२४; २०.९१.३ : हंसैरिव सखिभिर्वावदद्भिः....।
[१०३] तदेव, ८.७.२३-२५
[१०४] तदेव, ८.१४.१६ (१०.२९) : तद विषं सर्पा उपजीवन्त्युपजीवनीयो भवति..।
[१०५] तदेव, ६.१३९.५ : यथा नकुलो विच्छिद्य संदधात्यहिं पुनः ।
[१०६] तदेव, २०.४५.१ । अयमु ते समतसि कपोत इव गर्भधिम् ।
[१०७] तदेव, २०.१३५.१२ : श्यामाकं पक्वं पीलुं च वारस्मा अकृणोर्बृहुः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इत्यपि ते जानन्ति स्म । तेषां मते प्रेमप्रदर्शनार्थं हस्ती करिण्या पादैः सह स्वपादान् सम्मेल्य गच्छति।[१०८] रोगनिवारणेऽपि जीवानामुपयोगिता स्वीकृता । कृष्णमृगः स्वविषाणेन मातृपितृशरीरादागतं क्षयकुष्ठापस्मारादिकं रोगं नाशयितुं क्षमः ।[१०९] को जीवः कस्माद् जीवाद् बिभेतीति अथर्ववेदस्यैकस्मिन् सूक्ते वर्णितम् । तदनुसारमारण्याः मृगाः पुरुषाद् बिभ्यति[११०] । एवञ्च-अजावयो वृकाद्[१११], पतत्त्रिणः श्येनात् सिंहाच्च पशवो बिभ्यति ।[११२] पक्षिणो नीडं निर्मीय प्रायः कुत्राश्रयन्ति इत्यस्मिन्विषयेऽपि ते जानन्ति स्म । सामान्यतया पक्षिणः शोभनपर्णोपेतं पल्लवितं वृक्षमाश्रयन्ति ।[११३]

एवमेव सूकरः स्वनासया भोजनार्थं नागरमोथादीनि विदारयति[११४]। कपिः सर्वकेशकः भवति[११५] तेजनञ्च खादति[११६] । कपिशुनोर्मध्ये परस्परं वैरं भवति ।[११७] अथर्ववैदिका ऋषयः एतदपि जानन्ति स्म यद् गर्दभः गर्दभी च सिकतास्वेवात्मपरिश्रान्तिमपनेतुं शयाते[११८] । एवञ्च वृश्चिकस्य पुच्छे विषं भवति[११९] न तु आस्ये; परमयमास्येन पुच्छेन चोभाभ्यां प्रहरतीत्यपि ते सुष्ठुरूपेण जानन्ति स्म।[१२०]

---

[१०८] तदेव ६.७०.२ : यथा॑ ह॒स्ती ह॑स्ति॒न्याः प॒देन॑ प॒दमु॒द्यु॒जे...।
[१०९] तदेव, ३.७.१ हरिणस्य॑ रघु॒ष्यदो॑धि शी॒र्षणि॑ भेष॒जम् ।
स क्षे॒त्रिय॑ं वि॒षाणया विषू॒चीन॑मनीनशत् ॥
[११०] तदेव, ५.२१.४ : यथा॑ मृ॒गाः सं॒वि॒जन्त आर॒ण्याः पु॑रु॒षा॒दधि ।
[१११] तदेव, ५.२१.५ : यथा॒ वृका॑दजा॒वयो॒ धाव॑न्ति ब॒हु बि॑भ्य॒तीः ।
[११२] तदेव, ५.२१.६ : यथा॑ श्ये॒नात् प॑त॒त्रिणः॑ सं॒वि॒जन्ते॒....।
[११३] तदेव, २०.१७.४ : वयो॒ न वृ॒क्षं सु॑प॒ला॒शमास॑दन्त्सो॒मास॒ इन्द्र॑....। तुलनीयः. ऋ., १०.४३.४
[११४] अथर्व, २.२७.२ ; ५.१४.१ :.... सू॒क॒रस्त्वा॑खनन्न॒सा....।
[११५] तदेव, ४.३७.११ : क॒पि॒रि॒वैकः॑ कु॒मा॒रः सर्व॑केशकः .....।
[११६] तदेव, ६.४९.१ : क॒पि॒र्बभ॑स्ति॒ तेज॑न॒ं स्वं ज॒रायु॒ गौ॑रिव ।
[११७] तदेव, ३.९.४ : शु॒नः क॒पि॒रि॒व॒ दू॒ष॒णो॒ ब॒न्धु॒रा का॒ब॒वस्य॑ च ।
[११८] तदेव, २०.१३६.२ : विष्व॑ञ्चा व॒स्या वर्धे॑तः॒ सिक॑तास्वे॒व॒ गर्दभौ ।
[११९] तदेव, ७.५८ (५६). ६ : अथ॒ किं पा॒पया॑ऽमुया पुच्छे॑ बिभर्ष्यर्भ॒कम् ।
[१२०] तदेव, ७.५८ (५६). ८ : य उ॒भाभ्या॑ प्र॒हर॑सि पुच्छे॑न चा॒स्येन च ।
आ॒स्ये॑ न ते॑ वि॒षं किमु॒ ते पुच्छ॒धाव॑सत् ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथर्ववेदे प्राप्तैरुपर्युक्तैरुल्लेखैः स्फुटं प्रतिभाति यत् पुराकाले सूक्ष्मदर्शियन्त्रादीनामभावेऽपि वेदकालिकानामृषीणां प्राणिविषयकं ज्ञानं सम्यक् सूक्ष्मञ्चासीत् । ते च विविधानां जीवानां गुणस्वभावादीनां विज्ञानेन सुपरिचिता आसन् ।

प्रो. राजेश्वर मिश्रः
संस्कृत-विभागः, कुरुक्षेत्रविश्वविद्यालयः,
कुरुक्षेत्रम् - (हरियाणा)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अङ्क-२३
जनवरी-जून २०१४

वेदविद्या
ISSN-2230-8962

ऋग्वेदे वाचः प्रातिष्ठ्यम्

डॉ. कामदेव झाः

ऋग्वेदे महन्महत्त्वं प्रतिपादितमस्ति किल वाचस्तत्र नास्ति कश्चन सन्देह इति । ऋग्वेदस्य वाक्सूक्ते तु ऋषिकैव वागस्ति खलु । तत्र तु वैदिकऋषिकाः विविधाः दृश्यन्ते । इत्यनेन ध्वन्यते यत् वेदकाले महिलाः वैदुष्यपूर्णा आसन् । बृहद्देवता[१] ग्रन्थे तु ऋषिकास्तत्र परिगणिताः । तद्यथा- वाक्, श्रद्धा, कामायनी, शची, यमी, इन्द्राणी, अदिति, अपाला, आत्रेयी, शाश्वती, लोपामुद्रा, उर्वशी, घोषा, सूर्या, सावित्री गोधेति विराजन्ते । इयमेव नारी तत्र ऋग्वेदे सुमङ्गलीत्यनेन प्रोक्ता । स्मृतिस्तत्र वेदानुकर्त्री कथ्यते । तत्र स्मृतौ प्रतिपादितं यत् परमात्मना स्वशरीरस्य द्विभागः कृतः । तत्रार्धभागः पुरुषो जातः, अथ चापरः नारीत्वेन प्रथितः ।

अर्धनारीश्वरस्य या परिकल्पना कृताऽस्ति सा खल्वत्र साफल्यमेति । यस्य सङ्केतः कविकुलगुरुणा सर्वादौ स्वग्रन्थे कृत इति । यथोक्तं तत्र रघुवंशे -[२]

वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥

तुलसीदासोऽपि रामचरितमानसे 'वन्दे वाणीविनायकौ'[३] प्रतिपादयत्येव । वाक् विश्वकर्मऋषित्वेनापि[४] प्रोक्ता । शतपथब्राह्मणेऽपि[५] वाचा सर्वं ततमिति । ऐतरेयब्राह्मणग्रन्थे[६] तु अर्थस्य योनित्वेन प्रोक्तेति वाग् ।

---

[१] बृहद्देवता २.८२-८४
[२] रघुवंशम् १.१
[३] रामचरितमानसे, बालकाण्डे
[४] यजुर्वेदः १३.५८
[५] शतपथब्राह्मणे ८.१.२.९, वाचा हीदं सर्वं कृतम् ।
[६] ऐतरेयब्राह्मणे २.३८, वाग्योनिः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वाचः ये खलु समुपासकाः सन्ति तेषां खलु भिन्नैव गतिरिति । वाचः उपासकाः भवन्ति मृत्युञ्जया इति । ते मृत्युमतिवर्तन्ते[१] ये वै वाचमुपासते । महिमा भिन्न एव भवति खलु वाच इति । यस्योपरि भवति प्रसन्ना तमुपासकन्तु वाणी निजस्वरूपं प्रकटयति । एक एव जनः शृण्वन्नपि न शृणोति, पश्यन्नपि न पश्यति। सैव वाणी यदा प्रसीदति तदा त्वात्मानमपि घटयति प्रकाशयति वेति । यथोक्तं तत्र ऋग्वेदे -

उतत्वः पश्यन् न ददर्श वाचमुत त्वः शृण्वन् न शृणोत्येनाम् ।
उतो त्वस्मै तन्वं१ विसस्रे जायेव पत्य उशति सुवासाः ॥[२]

शब्दवृषभोऽत्र शब्दं कुर्वाणः मनुष्येषु प्रविष्ट इति । स वृषभः कथमासीत् खलु ? इत्यस्य प्रतिपादनं चित्रमेव कृतं खलु ऋग्वेदे । चत्वारि शृङ्गा इत्यनेन नामाख्यातोपसर्गनिपातश्चेति, त्रयोऽस्य पादा इत्यनेन कालत्रयं गृह्यते, द्वे शीर्षे इत्यनेन नित्यानित्यत्वेन शब्दो द्विविध इति । सप्तहस्तासो इत्यनेन सप्तविभक्तयस्तत्र खलु । तेन शब्दवृषभत्वेन सह सायुज्यमेव मोक्ष इति मनुते । इममेव मन्त्रभावं वीक्ष्य तत्र भगवता भर्तृहरिणोक्तं खलु । यथोक्तं तत्र -

अपि प्रयोक्तुरात्मानं शब्दमन्तरवस्थितं ।
प्राहुर्महान्तमृषभं येन सायुज्यमिष्यते ॥[३]

मुमुक्षुभिरिष्यते सायुज्यमिति भावः । साधूनामिदमेव लक्ष्यमिति । महाभाष्यकारस्तत्र[४] महता देवेन नः साम्यं यथा स्यादिति । मन्त्रस्यास्य व्याख्यायामस्यां अम्बाकर्त्री[५] व्याख्याकारस्त्वत्र - चत्वारि शृङ्गा इत्यादयो मन्त्राः पादत्रयशृङ्गचतुष्टयादिकल्पनया ज्ञातस्य कामानां वर्षकत्वाच्च महावृषभत्वेन कल्पितं परब्रह्मस्वरूपमाहुः । येन परब्रह्मरूपेण शब्देन सायुज्यं सम्बन्धः, तादात्म्यमिति

---

[१] हरिवृत्तिः (वाक्यपदीयम् १.१२६)
[२] ऋग्वेदः १०.७१.४
[३] वाक्यपदीयम् १.१३०
[४] महाभाष्यम् १
[५] अम्बाकर्त्री व्याख्या (वा.प. ब्रह्मकाण्डम्), पृ.सं. १९५

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यावत्, इष्यते मुमुक्षुभिः, तस्य प्रकाशमानानन्दरूपत्वेन परमपुरुषार्थत्वादिति ।एषः शब्दः मनुष्येषु आविवेश इति । यथा मन्त्रस्तत्र निगदत्यत्र -

चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य ।
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याँ आ विवेश ॥[१]

ऋग्वेदे एतदप्यत्र प्रत्यपादि यत् कल्याणमयी लक्ष्मीः सदैव वाचि तिष्ठति । वाचः विशोधनं क्रियते । यथा सक्तुं प्रचालनयन्त्रेण शोधयति तद्वदेवात्रापि इति भावः। यथोक्तं तत्र ऋग्वेदे -

सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत ।
अत्रा सखायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताधि वाचि ॥[२]

वाचः कतिविधं रूपमासीदित्यपि तत्र ऋग्वेदे ध्वन्यत इति । चत्वारि वाक् परिमिता पदानीत्यत्र वाचः चतुर्विधरूपमत्र द्योत्यते । व्याख्यायामस्यां भाष्यकारस्त्वत्र [३] - चत्वारि वाक्परिमितानि पदानि चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्चेति । महाभाष्यकारवचनेनानेन ध्वन्यते यत् वाचः यत् विविधरूपं भर्तृहरिणा प्रदर्शितं तत् रूपं नैवं समये तस्मिन् परिचितमासीत् ।

भर्तृहरिरेव प्रथमस्तत्र प्रतिपादकः प्रतीयते यः पश्यन्त्यादिरूपत्वेन [४] प्रतिपादयति । ततः परं नागेशेन[५] परा, पश्यन्ती, मध्यमा, वैखरीरूपेण चतुर्विधं निर्दिष्टम् । नागेशस्त्वत्र - परा वाङ्मूलचक्रस्था पश्यन्ती नाभिसंस्थिता ।
हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा ॥

एतदप्यत्रावगमनीयं यत् भर्तृहरिस्तु वाक्यपदीयब्रह्मकाण्डे वाचः त्रिविधरूपमेव सङ्केतयति । कारिकायां तु त्रय्या वाचः परं पदमेव व्याकरोति ।

---

[१] ऋग्वेदः ४.५८.३
[२] तदेव १०.७१.२
[३] महाभाष्यम् प्रथमाह्निके
[४] प्रसङ्गेऽस्मिन् मम पुस्तकं भर्तृहरिदर्शनं द्रष्टव्यमस्ति । (प्रकाशकः - निर्मल बुक एजेन्सी, कुरुक्षेत्रम्)
[५] परमलघुमञ्जूषा (स्फोटनिरूपणम्), पृ. सं. ९१-९२

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यथोक्तं तत्र-

वैखर्या मध्यमायाश्च पश्यन्त्याश्चैतदद्भुतम् ।
अनेकतीर्थभेदायास्त्रय्या वाचः परं पदम् ॥[१]

भर्तृहरिमते वाचः चतुर्विधं रूपमथवा त्रिविधमेवेत्यत्र विविधानि मतानि संदृश्यन्ते । केचन कथयन्ति यत् भर्तृहरिमते त्रिविधमेव रूपमिति । वाक्यपदीयस्य ग्रन्थस्यास्य काण्डत्रयमेव । एतदर्थं वाचः रूपं त्रिविधमेव । पश्यन्तीवैखर्योः मध्ये भवतीति मध्यमा वाक् याति सार्थक्यमिति भावः । इत्यनेन प्रतिभाति यत् भर्तृहरिमते वाचः त्रिविधमेव रूपं भवेदिति । आचार्यकपिलदेवशास्त्रिणः[२] विचारोऽयं विद्यते यत् भर्तृहरेः वृत्तौ 'परां प्रकृतिं प्रतिपद्यते[३]' इति तत्र वर्तते । अत एव भर्तृहरिस्तु परामपि स्वीकरोत्येव । प्रसङ्गेऽस्मिन् वृषभदेवस्तु[४] खल्वत्र - परामित्युत्कृष्टामिति । अनेन स्वत एव पूर्वमतं भवति खण्डितमिति । परेति शब्दोऽयम् उत्कृष्टार्थप्रतिपादक इति । आचार्यगौरीनाथशास्त्रिण अपि त्रिविधमेव व्याकुर्वन्तीति भावः । स्वोपज्ञवृत्तौ उद्धृतोऽयं श्लोकोऽपि तत्रोत्पादयति भ्रान्तिमिति । यथोक्तं तत्र-

अविभागा तु पश्यन्ती सर्वतः संहृतक्रमा ।
स्वरूपज्योतिरेवान्तः सूक्ष्मा वागनपायिनी ॥[५]

यत्र-तत्र सूक्ष्मा वागित्यस्य स्थाने परावागिति पाठभेदो दृश्यते । इत्यनेन कारणेन भर्तृहरिमते वाचः चतुर्विधं रूपमुद्घोषितमिति । इमं पाठं वीक्ष्य भावप्रदीप-टीकाकारेण सूर्यनारायणशुक्लेन[६] तु सूक्ष्मा वाग् पश्यन्त्येव किल स्वीकृता ।

---

[१] वा.प. १.१४२
[२] द्रष्टव्यम्, सम्मेलन पत्रिका(डॉ. कपिलदेव शास्त्री)वाणी के चार रूप-परा, पश्यन्ती,मध्यमा, वैखरी,पृ. २३
[३] स्वोपज्ञवृत्ति (वा.प. १.१४) पृ.सं. ३७ (अम्बाकर्त्रीव्याख्या संस्करणे)
[४] पद्धतिटीका, वृषभदेवकृता - पृ.सं. ४८ (अय्यरसम्पादिते संस्करणे)
[५] स्वोपज्ञवृत्ति (वा.प. १.१४२) पृ.सं. २१६ (पं. रघुनाथशर्मकृते संस्करणे)
[६] भावप्रदीपटीका (वा.प. १.१४२) पृ.सं. १५२

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वाणीविभागविषये कपिलदेव[१] द्विवेदिनः विचारोऽयं भिन्न एव प्रतिभाति । अनेन विदुषा भिन्नमेव वचनं प्रतिपाद्यते । कथनमस्य वर्तते यत् हेलाराजः पुण्यराजः वृषभदेवस्तु एक एव टीकाकार अस्ति । केवलं विचारवैविध्यमुपस्थापयितुं भिन्न-भिन्नं नाम्ना मतानि प्रस्तुतानीति भावः । वस्तुतः विवादस्तु केवलं कारिकायामुद्धृतं त्रय्यावाचः परं पदमिति न । तत्र तु स्वोपज्ञवृत्तौ किलोद्धृतं वचनमिति वीक्ष्य एव । कारिकायां तु केवलं वाचः त्रिविधमेव[२] रूपमुद्घोषितम् । नागेशभट्टस्य[३] कथनं विद्यते यत् परायां प्रकृतिप्रत्यययोरवगतिर्नास्ति खलु । अतएव व्याकरणातीता परेति। अतएव तत्र नोद्धृतं कारिकायामिति भावः । वाक्यपदीयस्य ब्रह्मकाण्डस्य फ्रांसीसीटीकाकर्त्री[४] एम. बियार्दोमहोदयापि भर्तृहरेः कारिकां वीक्ष्य वाचः त्रिविध-रूपमेवोररीकरोति । यद्यपि भर्तृहरिरपि ऋग्वैदिकमन्त्रेण तु परिचित आसीदेव । कारिकायां न कुत्रापि परा वाचः समुल्लेखः कृत इति । ऋग्वेदे तु चत्वारि वाचः रूपाणि वर्णितानि ।

चत्वारि वाक् परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः
गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति ॥[५]

वस्तुतः वाणीं विना वाग्व्यवहारो भवत्यसम्भव इति । इयमेव वार्तालापकार्य-सम्पादिका । वाणीं विना काष्ठकुड्यादिवत् भवति मनुष्य इति । स्वोपज्ञवृत्तावपि चोक्तं तत्र - **अर्थक्रियासु वाक् सर्वान् समीहयन्ति देहिनः ।**
तदुत्क्रान्तौ विसञ्ज्ञोयं दृश्यते काष्ठकुड्यवत् ॥[६]

---

[१] अर्थविज्ञान और व्याकरणदर्शन, पृ.७
[२] सन्दर्भेऽस्मिन् वाणी चतुर्धा त्रिधा वा इत्यत्र भर्तृहरिः, मम लेखो द्रष्टव्यः, (विश्वसंस्कृतम्, जून १९९६)
[३] महाभाष्योद्योतटीका, भा.१, पृ. ३३
[४] Dr. Biaradeau, Vakyapadiya Brahmakand, introduction, P.44
[५] ऋग्वेदः १.१६४.४५
[६] स्वोपज्ञवृत्तिः (वा.प. १.१२६), पृ. १८७ (अम्बाकर्त्रीव्याख्या संस्करणे)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

बृहदारण्यकोपनिषदि वाचः महिमा सर्वथा दृश्यते । तत्र किल नारदं प्रति सनत्कुमारस्योपदेशः दर्शनीय अस्ति । तत्र निगदितं यत् वाणी एव तु सत्यासत्य-साध्वसाधु किलाधारभूतेति । यथोक्तं तत्र-

यद्वै वाङ् नाभविष्यन्न धर्मो नाधर्मो सत्यं नानृतं न साधु नासाधु न हृदयज्ञो नाहृदयज्ञो वागेवैतत्सर्वं विज्ञापयति वाचमुपास्स्वेति । स यो वाचं ब्रह्मेत्युपास्ते यावद्वाचो गतं तत्रास्य यथा कामचारो भवति ।[१]

गोपथब्राह्मणेऽपि वाचः महिमा गीता अस्ति । तत्र वाणी आदिष्टवती यत् अशान्तमश्वमिमं शान्तं कुरुत । तत्र वेदत्रयं पूर्वं वाचाऽऽदिष्टमिति । वेदत्रयं तत्र विफली सञ्जातम् । ततः परं खल्वथर्ववेदेनाश्वः वशीकृत इति । यथोक्तं वर्णितं तत्र-

तान् वागभ्युवाच । अश्वः शाम्येतेति । तथेति तमृग्वेद एत्योवाचाहमश्वं शमेयमिति । तस्मा अविसृष्टाय महद्भयं ससृजे । स एतां प्रतीचीं दिशं भेजे । स हो वाचा शान्तो न्वयमश्व इति । तं सामवेद एत्वोवाचाहमश्वं शमेयमिति । केन नु त्वं शमिष्यसि । रथन्तरं नाम मे सामा घोर चाक्रूरं च तेनाश्वमभिष्टूयते । तस्मा अथ विसृष्टाय तदेव महद्भयं ससृजे । स एतामुदीचीदिशं भेजे । स हो वाचा शान्तो न्वयमश्व इति ।[२]

वचसः किलोपासकाः मृत्युमतिवर्तन्ते[३] । अत एव निगदितं यत् **'ते मृत्युमतिवर्तन्ते ये वै वाचमुपासते'** । अतएव भर्तृहरिणा निगदितं यत् 'प्रकाशं यमुपासते'।[४]

ऋग्वेदे तु अष्टौमन्त्रास्तत्र केवलं वाचः महिमानं प्रतिपादयन्ति । वाणी खल्वत्राऽऽत्मविवेचनं कुरुते । तत्र प्रथमे मन्त्रे निगदितं यत् वागियं बहुरूपत्वेन

---

[१] छान्दोग्योपनिषद् १.१-२

[२] गोपथब्राह्मणे १.२.१८

[३] वाक्यपदीयम् (१.१२६, स्वोपज्ञवृत्तौ उद्धृतम्) पृ.सं. १८९

[४] वाक्यपदीयम् १.१९, - वैकृतं समतिक्रान्ता मूर्तिव्यापारदर्शनम् ।
व्यतीत्यालोकतमसी प्रकाशं यमुपासते ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विचरति । एकादशरुद्ररूपेणाष्टवसुरूपेण द्वादशाऽऽदित्यरूपेण, विश्वदेवत्वेन विचरतीति भावः । अथ चेयं वाग् मित्रावरुणौ इन्द्रमग्निं चाश्विनीकुमारावपि धारयतीति। यथोक्तं तत्र - अहं रुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुत विश्वदेवैः ।
अहं मित्रावरुणोभा बिभर्म्यहमिन्द्राग्नी अहमश्विनोभा ॥[१]

यत् किमपि वाचा क्रियते तत्सर्वं जगतः कारणरूपत्वेन ब्रह्मणा सह सम्भूय रूपवैविध्यं धारयतीति । सायणस्त्वत्र- अहं सूक्तस्य द्रष्ट्री वागाम्भृणी यत् ब्रह्म जगत्कारणं तद्रूपा भवन्ती रुद्रेभी रुद्रैरेकादशभिः । इत्थं भावे तृतीया तदात्मना चरामि।[२]

अत्रैतत् ध्यातव्यमस्ति यत् वाचः खल्वात्मविवेचनमुत्तमपुरुषत्वेन कृतमिति । वैदिकी नारी निश्चप्रचं शक्तियुता वर्तते । धनबलयुक्ता सर्वथा तत्र प्रतिभाति । धनप्रदायिनीयं वागास्ति । ये किलोपासनां कुर्वन्ति वाचः ते तु प्राप्नुवन्ति वित्तमिति । प्रापयित्रीयं धनं खलु । अतएव वेदमन्त्रः करोत्युद्घोषमिति । धनदा बलदेयं वागिति । वेदे नारीरूपेयं वाक् सर्वगुणसम्पन्नेति। यथा वेदमन्त्रस्तत्र प्रस्तौति -

अहं राष्ट्री संगमनी वसूनां चिकितुषी प्रथमा यज्ञियानाम् ।
तां मा देवा व्यदधुः पुरुत्रा भूरिस्थात्रां भूर्यावेशयन्तीम् ॥[३]

अत्राहं राष्ट्रीति राष्ट्रनिर्मात्री शक्तिरिति।[४] सायणस्त्वत्रप्रसङ्गे - ईश्वर[५] नामैतत् । सर्वत्र जगतः ईश्वरीति । जगतः कारणभूतेति वागिति भावः । उपर्युक्तेन वचनेन प्रतीयते यत् वाक् किलैश्वर्ययुतेति ।

---

[१] ऋग्वेदः १०.१२५.१
[२] सायण भाष्यम् (ऋ. १०.१२५.१)
[३] ऋग्वेदः १०.१२५.३
[४] द्रष्टव्यम्, अर्थविज्ञान और व्याकरणदर्शन (डॉ. कपिलदेव द्विवेदी कृते), पृ.सं. २१
[५] सायणभाष्यम् (ऋग्वेदः १०.१२५.३)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वाणी तत्रोद्घोषयति यत् सर्वमत्रोपभोगवस्तु तयैव दीयत इति । प्राणिनः भवन्ति प्राणवन्तस्तत्राहमेव करोमि सम्पादनं खलु कार्यस्यास्येति । ये न जानन्ति ममैश्वर्यमिति प्राप्नुवन्ति ते हीनताम् । सैवोपदेष्ट्रीति । यथा मन्त्रस्तत्र व्याकरोति -

मया सो अन्नमत्ति यो विपश्यति यः प्राणिति य ईं शृणोत्युक्तम् ।
अमन्तवो मां त उप क्षियन्ति श्रुधि श्रुत श्रद्धिवं ते वदामि ॥[१]

वस्तुतः वागियं प्राणरूपा । समस्ता लोकयात्रा वाचैव तु सम्भवति । एतदर्थं मन्त्रस्तत्र निगदति यत् संसारिणः वाणीं विना हीना इति । वाचि यस्याधिकारः स एव भवति वाचस्पतिरिति भावः । एतदर्थमेव वेदे सर्वं निगदितम् । इयं वाणी ब्रह्मपरकं ज्ञानमपि प्रददाति । इयं ब्रह्मोपदेशिका । यदा इयं प्रसीदति तदा तु सर्वस्वं प्रयच्छति। यमुपासकं वागियं कामयते तं तु तेजोवन्तं करोतीति । वाचैव तु लोके मनुष्यः भवतीड्य इति । कृत्स्नमेतत् वाचः महत्त्वमेव । यथा मन्त्रोऽयं व्याकरोति -

अहमेव स्वयमिदं वदामि जुष्टं देवेभिरुत मानुषेभिः ।
यं कामये तं तमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधाम् ॥[२]

वाणी निजोपासकं सदैव रक्षति । यं रक्षितुमिच्छति, तमुग्रं करोति । सायणस्त्वत्र यं[३] कामयते यं पुरुषं रक्षितुमहं वाञ्छामि तं तं पुरुषमुग्रं कृणोमि । सर्वेभ्योऽधिकं करोमि । तमेव ब्रह्माणं स्रष्टारं करोमि । वस्तुतः वाच अपूर्वा महिमा प्रोक्ता इति । लोकेऽपि तु दृश्यते यत् यस्य वाक् मधुरा शैत्ययुता च भवति स एव सर्वप्रियो भवति । नास्त्यत्र कश्चन सन्देह इति । अयमेव भावस्तत्र प्रतिपादितो वर्तते। वाचैव किल ततं विश्वम् । वाक्यपदीयस्य स्वोपज्ञवृत्तौ निगदितं तदेव तत्र-

वागेव विश्वा भुवनानि जज्ञे वाच इत्सर्वममृतं यच्च मर्त्यम् ।
अथेद्वाग् बुभुजे वागुवाच पुरुत्रा वाचो न पदं यच्चनाह ॥[४]

---

[१] ऋग्वेदः, १०.१२५.४
[२] तदेव, ५
[३] सायणभाष्यम् (ऋग्वेदः १०.१२५.५)
[४] वाक्यपदीय स्वोपज्ञवृत्तौ (वा.प. १.१२०) पृ.सं. १७६

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नारी न केवलं धनबलयुता वर्तते अपितु शरीरबलयुताऽपि तत्र ऋग्वेदे परिलक्ष्यते । वैदिकी नारी वाक् तु रुद्रस्य कृते प्रत्यञ्चामपि विस्तारयति । इत्यनेन ध्वन्यते यत् वैदिकी नारी सबला नत्वबलेति । तत्कथमत्र समाजे नारी अबलेति शब्देन चोच्यते । वस्तुतः चिन्तनीयोऽयं विषय इति भावः । जनानां कल्याणायापि सैव वाक् शत्रुभिः सह कुरुते युद्धमिति । यथा ऋग्वेदीयो मन्त्रः करोत्यत्र घोषम् । तद्यथा -

अहं रुद्राय धनुरा तनोमि ब्रह्मद्विषे शरवे हन्तवा उ ।
अहं जनाय समदं कृणोम्यहं द्यावापृथिवी आ विवेश ॥[१]

मन्त्रस्यास्य व्याख्यायामत्र सायणस्तु[२]- पुरा त्रिपुरविजयसमये रुद्राय रुद्रस्य । षष्ठ्यर्थे चतुर्थी । महादेवस्य धनुश्चापमहमातनोमि, ज्यया आततं करोमि । वाणी युद्धे शत्रुभिः साकं करोति स्म युद्धमिति वीक्ष्यानुभूयते यत् नारी युद्धकार्ये कृतभूरिपरिश्रमेति। कैकेयी त्वपि दशरथेन साकं युद्धक्षेत्रे गत्वा करोति स्म सहायतामिति । तत्र तया रथस्य चक्रं धृत्वा प्रदर्शितं स्वशक्तित्वमिति । वैदिकमन्त्रमिमं वीक्ष्य रामायणीयं वचः याति सार्थक्यमिति भावः । वाणी धनुर्विद्यायां कुशला किल । अतएव तु सा वाक् द्युलोके पृथिवीलोके व्याप्नोति सर्वमिति । लोकेऽपि बालाः धनुर्विद्यायां दृश्यन्ते प्रवीणा इति । उपर्युक्तं प्रसङ्गं दृष्ट्वा तु सुतरां भवति सिद्धं यत् नारीणां तत्र ऋग्वेदकाले स्वर्णकाल आसीदित्यत्र नास्ति सन्देहः । नारी तु सदा सबलैव किल । इयमेव वाक् प्रेरयति युद्धाय खलु । विश्वस्य कल्याणार्थं तुमुला प्रेरणाशक्तिरिति । एतदर्थं शक्तिराद्येयमिति भावः । वाचः चित्रा एव महिमा खलु । वाक् तु कारणरूपा । इयमेव वाणी कारणभूता किल समुद्रस्य । जलेऽपि वाचः कारणत्वशक्तिरिति । इयमेव वाक् समस्तसृष्टिरूपेषु व्याप्तेति । त्रिलोक-निर्मात्रीरूपा इयमेव वागिति । वाचः उद्घोषोऽयं विद्यते यत् सर्वस्याहं सृष्टिमूलेति

---

[१] ऋग्वेदः १०.१२५.६
[२] सायणभाष्यम् (१०.१२५.६)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भावः । सर्वत्र किल वाचः प्रसाद एव । मम[१] योनिरित्यत्रोद्घोषयति वाक् । इयं खलु कारणभूतशरीरेण स्पृशति सर्वत्र सर्ववस्तूनीति । यथोद्घोषयति मन्त्रः -

अहं सुवे पितरमस्य मूर्धन्मम योनिरप्स्वन्तः समुद्रे ।
ततो वि तिष्ठे भुवनानु विश्वोतामूं द्यां वर्ष्मणोप स्पृशामि ॥[२]

मन्त्रास्यास्य घोषस्तत्र विद्यते यत् सर्वभूतेषु इयमेव वाक् सम्प्रविश्य तिष्ठति । पितरमाकाशं[३] किलेयं वाणी जनयति । इयमेव वाक् वायुः इव सर्वभूतेषु प्रविश्य तिष्ठति । वात इव प्रवामीति तत्रोक्त्वा स्पष्टीकरोति निजव्यापकत्वभावमिति । यथोक्तं तत्र - अहमेव वात इव प्र वाम्यारभमाणा भुवनानि विश्वा ।
परो दिवा पर एना पृथिव्यै तावती महिमा सं बभूव ॥[४]

इयमेव वायुरिव भ्रामयति लोकमिति । वस्तुतः मनुष्यो यत् किमपि कुरुते तत्र वाच एव महिमा । सर्वप्रकारकं भोगमपि[५] कुरुते लोकस्तत्र वाच एव महिमा । प्रेरिकाशक्तिरपि इयमेव त्वत्र । इयं किल वाक् ऋग्वेदस्य दशममण्डले किलोत्तमपुरुषत्वेन निजां लीलां वर्णयति । लोकेऽपि दृश्यते यत् वाणीं विना मनुष्यः अर्थहीनः संवादहीनश्चापि । वाचा एव वस्तुतः प्रचलति लोकयात्रा इत्यर्थः।

डॉ. कामदेव झाः
प्राचार्यः, डी.ए.वी. कॉलेज,
पेहवा (कुरुक्षेत्रं) हरियाणा

[१] ऋग्देवः १०.१२५.७
[२] तदेव १०.१२५.७
[३] सायणभाष्यम्, (१०.१२५.७) पितरमाकाशं सुवे ।
[४] ऋग्वेदः १०.१२५.८
[५] (ऋग्वेदः, १०.१२५.४) सायणभाष्ये, योऽन्नमत्ति स भोक्तृशक्तिरूपया मयैवान्नमत्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अङ्क-२३
जनवरी-जून २०१४

वेदविद्या
ISSN-2230-8962

औपनिषदकं भाषादर्शनम्

डॉ. सन्तोष कुमार शुक्लः
ठाकुर शिवलोचन शाण्डिल्यः

वाक्तत्त्वचिन्तनेन भारतीयदार्शनिकपरम्परायां महत्त्वपूर्णं स्थानं प्राप्तमस्ति। वाक्यपदीयकारेणाचार्यभर्तृहरिणा अस्मै वाक्तत्त्वायैव शब्दतत्त्वं प्रोक्तम्, यदनादिनिधनमक्षरञ्चास्ति -

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः॥[१]

अर्थात् अनादिनिधनं विकारशून्यं शब्दतत्त्वमेव ब्रह्म वर्तते। संसारेऽस्मिन् शब्दब्रह्मैव विभिन्नघटपटादिवस्तुरूंपेण प्रतिभासते येन जगतः सर्वाः क्रियाः सम्पाद्यन्ते। एवं प्रकारेण शब्दब्रह्मैव सम्पूर्णजगतः विवर्तोपादानकारणं सिध्यति - **"यतो वा इमानि भूतानि जायन्ते।"**

आचार्यदण्डिना स्पष्टं स्वकाव्यादर्शग्रन्थे भणितं यत् वाचः प्रसादेनैवास्य जगतः सम्पूर्णलोकव्यवहारः सम्पद्यते -

इह शिष्टानुशिष्टानां शिष्टानामपि सर्वथा।
वाचामेव प्रसादेन लोकयात्रा प्रवर्तते॥[२]

निरुक्तकारः "वाक्" इत्यस्य शब्दस्य व्युत्पत्तिं कुर्वाणोऽकथयत्। यत् **"वाक् कस्मात्। वचेः।"**[३]

लौकिकसन्दर्भे "वाक्" (स्त्री.) इति शब्दोऽयं "वच् परिभाषणे" इत्यनेन धातुना सह क्विप्-प्रत्यये जाते दीर्घसम्प्रसारणे च जाते निष्पद्यते। अस्य व्युत्पत्तिः -

---

[१] वाक्यपदीयम् १/१
[२] काव्यादर्शः १/३
[३] निरुक्तम् २/२३

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

"उच्यतेऽसौऽनया वा।" अस्य शाब्दिकोऽर्थः - 'शब्दः', 'वाणी', 'भाषा', 'लोकोक्तिः', 'देव्याः सरस्वत्याः नाम'।[१] उपनिषद्वाङ्मये "वाक्" शब्दः 'वद् धातुः' (वद् व्यक्तायां वाचि) एवं 'भाष् धातुः' (भाष् व्याख्यायां वाचि) इत्येताभ्यां निष्पन्नो जातः। विभिन्नोपनिषत्सु "वाक्" इत्यस्य शब्दस्य प्रयोगोऽधोलिखितार्थेषु जातोऽस्ति।

(क) वाक् शब्दः। वदन् वाक्।[२]

(ख) अभिव्याहाराय वाक्।[३]

(ग) वदन्तो वाचा।[४]

वाचः भेदचतुष्टयम्

भारतीयभाषाचिन्तने वाचो भेदचतुष्टयं कथितमस्ति - 'परा', 'पश्यन्ती', 'मध्यमा', 'वैखरी' च। सन्दर्भेऽस्मिन् ऋग्वेदस्याधोलिखितमन्त्रः स्रोतस्वरूपेण मन्यते -

चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः।
गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति॥[५]

नागेशभट्टेन परमलुमञ्जूषायामस्या वाचः स्वरूपवर्णनमधोलिखितकारिकाणां माध्यमेन कृतमस्ति -

परा वाङ्मूलचक्रस्था पश्यन्ती नाभिसंस्थिता।
हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा॥
वैखर्या हि कृतो नादः परश्रवणगोचरः।
मध्यमाया कृतो नादः स्फोटव्यञ्जक उच्यते॥

---

[१] शब्दार्थकौस्तुभः पृ. १०३३
[२] बृहदारण्यकोपनिषद् १/४/७
[३] छान्दोग्योपनिषद् ८/१२/४
[४] छान्दोग्योपनिषद् ५/१/१०, एवं बृहदारण्यकोपनिषद्, ६/१/९, १२
[५] ऋग्वेदः १/१६४/४५

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मूलाधारचक्रे विराजमाना प्राणवायुसंस्कारसंयुक्ता कारणबिन्दुस्वरूपा वाक् परा कथ्यते। एषा परावाक् लोकव्यवहारातीता, अत्यन्तसूक्ष्मा, अवयवरहिता, अनपायिनी च वर्तते। एषा योगिभ्यः समाध्यवस्थायां निर्विकल्पकज्ञानस्य कारणमस्ति। यदैषा वाक् वायुप्रेरिता भूत्वा नाभिप्रदेशपर्यन्तमागच्छति, तदा सा "पश्यन्ती" कथ्यते। पश्यन्ती वागपि व्यवहारातीतास्ति। वाक्यपदीयकार इमां वाचं प्रतिभयाभिहितवान्। योगिनामवस्थायामियं सविकल्पकज्ञानविषयो भवति। नाभिप्रदेशात् वायुप्रेरिता भूत्वा हृदुप्रदेशं प्राप्य सा वाक् 'मध्यमा' उच्यते, अस्यां स्थितौ विवक्षितार्थस्य वाचकशब्दो निश्चीयते। मध्यमा बुद्धा विषयो भवति, यतो ह्यस्यामवस्थायामेवार्थो बुद्धिगोचरो भवति तथा तस्य वाचकशब्दस्य निर्धारणं भवति, अतः मध्यमायाः नादः नागेशभट्टेन स्फोटव्यञ्जकः कथितोऽस्ति। हृदयप्रदेशात् वायुप्रेरिता इयं वाक् यदा कण्ठप्रदेशं प्राप्नोति तथा विभिन्नोच्चारणस्थानैः बहिर्निःसरति तदा इयं सर्वसंवेद्या "वैखरी वाक्" कथ्यते।

वैदिकवाङ्मये 'वाक्' एका महती शक्तिरूपेण कथितास्ति। ऋग्वेदस्य दशममण्डलस्य पञ्चविंशत्यधिकैकशततमे सूक्ते वाचः देवतारूपेण स्तुतिः कृतास्ति। अत्र अम्भृण-ऋषेः पुत्र्या वाग्देव्याः महत्त्वं वर्णितमस्ति। इयं वागेव समेषां देवानां प्रेरिकास्ति, तथा ब्रह्मणो व्यवहारशक्तिरूपेण प्रत्येकं कार्यस्य पृष्ठभूमौ वर्तमाना भवति। इन्द्रियाणि सर्वाणि अस्याः कारणादेव नियन्त्रितानि भवन्ति। सर्वेषु वस्तुष्वियमेव व्याप्तास्ति। स्वविश्वरूपे वाक् सर्वव्यापिका, विश्वस्य सर्वपदार्थनिर्मात्री च वर्तते। अस्मिन् सूक्ते वाग्देवी कथयति -

अहमेव स्वयमिदं वदामि जुष्टं देवेभिरुत मानुषेभिः।
यं कामये तं तमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधाम्॥[१]

[१] ऋग्वेदः १०/१२५/५

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इदं वाक्सूक्तं (ऋक्. १०/१२५) उपनिषदां भाषादर्शनार्थं सर्वथा बीजवत् वर्तते। प्रमुखोपनिषत्सु वाक्तत्त्वचिन्तनाय़ात्यधिकं महत्त्वं प्रदत्तमस्ति। Vedic Concordance इत्यस्य पृष्ठसङ्ख्या ८२९-८३३ इत्यस्यानुसारमुपनिषत्सु "वाक्" शब्दस्य प्रयोगः ३८ (अष्टात्रिंशद्वारम्) जातोऽस्ति।

प्रमुखोपनिषत्सु वाक्-चिन्तनम्

विभिन्नोपनिषत्सु "वाचः" स्वरूपमेवं गुणानां विस्तरेण विवेचनं कृतमस्ति। छान्दोग्योपनिषदि "वाचः" निम्नलिखितस्वरूपं प्रोक्तमस्ति -

"वाग्वाव नाम्नो भूयसी वाग्वा ऋग्वेदं विज्ञापयति यजुर्वेद सामवेदमाथर्वणं चतुर्थमितिहासपुराणं पञ्चमं वेदानां वेदं पित्र्य राशिं दैवं निधिं वाकोवाक्यमेकायनं देवविद्यां ब्रह्मविद्यां भूतविद्यां क्षत्रविद्यां नक्षत्रविद्यां सर्पदेवजनविद्यां दिवं च पृथिवीं च वायुं चाऽऽकाशञ्चापश्च तेजश्च देवाँश्च मनुष्याँश्च पशूँश्च वयाँसि च तृणवनस्पतीञ्श्वापदान्याकीटपतङ्गपिपीलकं धर्मं चाधर्मं च सत्यं चानृतं च साधु चासाधु च हृदयज्ञं चाहृदयज्ञं च यद्वै वाङ्नाभविष्यन्न धर्मो नाधर्मो व्यज्ञापयिष्यन्न सत्यं नानृतं न साधु नासाधु न हृद्यज्ञो नाहृदयज्ञो वागेवैतत्सर्वं विज्ञापयति वाचमुपास्स्वेति।"[1]

अर्थात् "वाक्" जिह्वामूलाद्यष्टस्थानेषु स्थिता वर्णाभिव्यञ्जिका 'इन्द्रियम्' इति अभिधीयते। वर्ण एव नाम्नः कारणमस्ति। अतः नाम्नो 'वाक्' उत्कृष्टास्ति, यतो हि कार्यापेक्षया कारणोत्कृष्टता लोके दृश्यत एव। वागेव "ऋग्वेदाय" अयम् ऋग्वेदोऽस्तीति एवं प्रकारेण विज्ञापयति। वागेव यजुर्वेदम्, अथर्ववेदम्, सामवेदम्, पञ्चमवेदम्, इतिहासपुराणम्, व्याकरणम्, श्राद्धकल्पम्, गणितशास्त्रम्, निधिज्ञानम्, तर्कशास्त्रम्, नीतिशास्त्रम्, निरुक्तम्, वेदविद्याम्, भूतविद्याम्, धनुर्वेदम्, ज्योतिषम्, सङ्गीतशास्त्रम्, द्युलोकम्, पृथ्वीम्, वायुम्, आकाशम्, तेजः, देवम्, मनुष्यम्, पशु-पक्षिणम्, तृण-वनस्पतिम्, श्वपादम्, कीटादिपिपीलिकापर्यन्तम्, धर्मम्, अधर्मञ्च,

[1] छान्दोग्योपनिषद् ७/२/१

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सत्यम्, असत्यञ्च, साधुम्, असाधुञ्च विज्ञापयति। संसारे यद् किमपि स्यात् तद् सर्वं वागेव बोधयति। यदि वाक् न स्यात् तर्हि न धर्मबोधो भवेत् न च अधर्मबोधो भवेत्। सत्यं किमसत्यं किं साधुः कः असाधुः कः ? वाचा विना ज्ञातुं न शक्यते। एवं प्रकारेण वागेव समेषां ज्ञानं कारयति।

आचार्यभर्तृहरिणापि वाक्यपदीयब्रह्मकाण्डे उपर्युक्ततथ्यानामेवाधोलिखित-कारिकायां समर्थनं कृतम् -

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भाषते ॥[१]

अर्थात् संसारे सर्वं ज्ञानं वाचा सह तादात्म्येनैव भाषितं भवति। लोकेऽस्मिन् नास्त्येतादृशं ज्ञानं यत् शब्दसम्बद्धं विना सम्भवेत्।

महाकविर्दण्डी काव्यादर्शे प्रतिपादितवान् यत् यदि वाग्रूपा ज्योतिः इमं संसारं न प्रकाशयेत्, तर्हि इदं भुवनत्रयम् अन्धकारमयं भवेत् -

इदमन्धन्तमः कृत्स्नं जायेत भुवनत्रयम् ।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते॥[२]

वृहदारण्यकोपनिषदि प्रज्ञास्वरूपा एवं परमब्रह्मरूपा वाक् मन्यते -

"वागेवाऽऽयतनमाकाशः प्रतिष्ठा प्रज्ञेत्येनदुपासीत। का प्रज्ञता याज्ञवल्क्य वागेव सम्राडिति होवाच। वाचा वै सम्राड्बन्धुः प्रज्ञायते ऋग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानानीष्टँ हुतमाशितं पायितमयं च लोकः परश्च लोकः सर्वाणि च भूतानि वाचैव सम्राट् प्रज्ञायन्ते वाग्वै सम्राट् परमं ब्रह्म।"[३]

---

[१] वाक्यपदीयम् १/११४
[२] काव्यादर्शः १/४
[३] वृहदारण्यकोपनिषद् ४/१/२

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अर्थात् वागेव प्रज्ञास्ति, यतो हि वाचैव बन्धुरवगम्यते। वाचा वै ऋग्वेदो, यजुर्वेदः, सामवेदः, अथर्ववेदः, इतिहासादयश्च ज्ञायन्ते अतः वागेव परब्रह्मरूपास्ति। बृहदारण्यकोपनिषद्युक्तमस्ति यल्लोके यावन्तः शब्दाः, ध्वन्यादयः सन्ति। सर्वो ध्वनिः "वागेव" अस्ति -

यः कश्च शब्दो वागेव सा।[१]

बृहदारण्यकोपनिषद्शाङ्करभाष्ये कथितमस्ति, यल्लोके प्राणिभिः मुखताल्वादिना अभिव्यज्यमाना यावन्तः वर्णादिरूपशब्दध्वनयः तथा वाद्ययन्त्रैर्मेघादिभिश्च जायमाना ये केऽपि शब्दध्वनयः सन्ति, सर्वो ध्वनिः "वागेव" अस्ति -

यः कश्च लोके शब्दो ध्वनिस्ताल्वादिव्यङ्ग्यः प्राणिभिर्वर्णादि लक्षण इतरो वा वादित्रमेघादिनिमित्तः सर्वो ध्वनिर्वागेव सा।[२]

उपनिषत्सु "वाक्" प्रकाशस्वरूपा कथितास्ति। बृहदारण्यकोपनिषदि प्रोक्तमस्ति। यत् दीप इव वागपि स्वयं प्रकाशिकास्ति। अन्यः कश्चिदपि एनां वाचं प्रकाशयितुं न शक्नोति। अस्याभिप्रायोऽस्ति यत् वाचः कार्यमेव प्रकाशनमस्ति। अस्या उपनिषद एव अन्यस्मिन् स्थले प्रोक्तमस्ति, दिशां ज्ञानस्य कारयित्री प्रकाशिका च वागेवास्ति -

अस्तमित आदित्ये याज्ञवल्क्य चन्द्रमस्यस्तमिते शान्तेऽग्नौ किं ज्योतिरेवायं पुरुष इतिवागे वास्य ज्योतिर्भवति इति वाचैवायं ज्योतिषाऽऽस्ते पल्ययते कर्म कुरुते विपल्येतीति तस्माद्वै सम्राडपि यत्र स्वः पाणिर्न विनिर्ज्ञायतेऽथ यत्र वागुच्चरत्युपैव तत्र न्येतीत्येवमेवैतद्याज्ञवल्क्य॥[३]

अर्थात् यदा सूर्यः चन्द्रश्च अस्तं गच्छति, अग्नेः प्रकाशस्याप्यभावो भवति, तदा व्यक्तेः पार्श्वे कस्य प्रकाशो भवति? निःश्चयेनैव प्रकाशोऽयं "वागेव" अस्ति। वाच एव प्रकाशे मनुष्य इतस्ततः भ्रमति, स्वकार्यं सम्पादयति, पुनश्च प्रत्यावर्तितो भवति।

---

[१] बृहदारण्यकोपनिषद् १/५/३

[२] बृहदारण्यकोपनिषद् १/५/३ शाङ्करभाष्यम्

[३] बृहदारण्यकोपनिषद् ४/३/५

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कश्चिदपि अन्धकारे स्वहस्तं यदा न पश्यति, तस्मिन् काले यदा ध्वनिर्भवति। तस्य ध्वनिश्रवणेन मानवः तं ध्वनिं प्रति गच्छति। एवं प्रकारेण वागेव दिशां ज्ञानं कारयति।

प्रश्नोपनिषदि चतुर्दशदेवतासु वाक् शरीरधारिणी एका शक्तिर्मन्यते। अत्र भार्गवर्षिणा महर्षिः पिप्पलादः पृच्छ्यते। यत् प्राणिनां शरीरं कति देवताः धारयन्ति? तथा तासु का शरीरमिदं प्रकाशयति? अस्य प्रश्नस्योत्तरे पिप्पलाद आह -

तस्मै स होवाचाकाशो ह वा एष देवो वायुरग्निरापः पृथिवी वाङ्मनश्चक्षुः श्रोत्रञ्च। ते प्रकाश्याभिवदन्ति वयमेतद्बाणमवष्टभ्य विधारयामः॥ [१]

अर्थात् समेषामाधारस्तु आकाशरूपदेवतैवास्ति, परन्तु तस्माज्जायमानः वायुः, अग्निः, जलम्, पृथिवी इति चत्वारो महाभूताप्यस्य शरीरस्य धारिण्यो देवताः सन्ति। इदं स्थूलशरीरम् एतेभ्य एव निर्मितमस्ति। वागादिपञ्चकर्मेन्द्रियाणि, नेत्रादिपञ्चज्ञानेन्द्रियाणि एवं मनसाद्यन्तःकरणचतुष्टयम्, इत्येताः चतुर्दशदेवता एवास्य शरीरस्य प्रकाशकत्वेन कथ्यन्ते।

ध्यातव्यमस्ति यत् वाक्यपदीयकारः 'वाचे' प्रत्यवमर्शिनी कथयन् प्रोक्तवान् यत् यदि नित्यवाग्रूपता न भवेत् तर्हि कस्यचिदपि ज्ञानस्य प्रकाशनमेव न भवितुं शक्नोति -

वाग्रूपता चेदुत्क्रामेदवबोधस्य शाश्वती।
न प्रकाशः प्रकाशेत सा हि प्रत्यवमर्शिनी॥ [२]

छान्दोग्योपनिषदि भणितमस्ति यत् "वाक्" तेजस्विनी वर्तते -

अन्नमयं हि सोम्य मन आपोमयः प्राणस्तेजोमयी वागिति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच॥ [३]

---

[१] प्रश्नोपनिषद् २/२
[२] वाक्यपदीयम् १/११५
[३] छान्दोग्योपनिषद् ६/६/५

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

छान्दोग्योपनिषदनुसारं मनुष्यैः खाद्यमानं तैलघृतादिकं पदार्थं त्रिधा विभक्तं भवति। तस्य स्थूलतमो भागः अस्थि, मध्यमभागो मज्जा तथा सूक्ष्मभागो वाक् भवति। अग्निना देवतारूपेण वैदिकंसंस्कृतावत्यधिकं महत्त्वं प्राप्तमस्ति। विभिन्नोपनिषत्सु वाक् अग्निशब्देनापि सम्बोधितास्ति। ऐतरेयोपनिषदि भणितमस्ति यत् ब्रह्माण्डे योऽग्निर्वर्तते, स एव पिण्डे 'वाग्स्वरूपा' अस्ति। सृष्टिप्रारम्भेऽग्निर्वाक् भूत्वा पुरुषमुखे प्राविशत् ;-

अग्निर्वाग्भूत्वा मुखं प्राविशत्॥[१]

छान्दोग्योपनिषदीश्वरस्य पश्चिमोदगमस्थानरूपेण 'वाक्' अभिहिता तथा वाचेऽग्नेः पर्यायमभिधायास्याः सर्वव्यापकता प्रोक्तास्ति ;-

अथ योऽस्य प्रत्यङ्ङृषिः सोऽपानः सा वाक्सोऽग्निस्तदेतद्ब्रह्मवर्चसमन्नाद्यमित्युपासीत ब्रह्मवर्चस्यन्नादो भवति य एवं वेद॥[२]

छान्दोग्योपनिषदि प्रोक्तमस्ति यत् मानव आहूताग्निर्वर्तते। अस्यामहूतौ वागेव समिदर्थात् हविः, श्वासो धूम्रः, तथा तस्याहवनीयस्याग्नेः अर्चिर्जिह्वा कथ्यते ;-

पुरुषो वाव गौतमाग्निस्तस्य वागेव समित्प्राणो धूमो जिह्वाऽर्चिश्चक्षुरङ्गाराः श्रोत्रं विस्फुलिङ्गाः ।[३]

बृहदारण्यकोपनिषदि मानवः यज्ञाग्नेर्स्वरूपं मन्यते। अत्र वागैव तस्याग्नेः अर्चित्वेन स्वीकृतास्ति ;-

पुरुषो वा अग्निर्गौतम तस्य व्यात्तमेव समित्प्राणो धूमो वागर्चिश्चक्षुरङ्गिराः श्रोत्रं विस्फुलिङ्गास्तस्मिन्नेतस्मिन्नग्नौ देवा अन्नं जुह्वति तस्या आहूत्यैरेतः सम्भवति।

तैत्तिरीयोपनिषदनुसारं वाग् कर्मेन्द्रियाणां ज्ञानेन्द्रियाणाञ्च सन्धिरूपास्ति ;-

अथाध्यात्मम्। अधरा हनुः पूर्वरूपम्। उत्तरा हनुरुत्तररूपम्। वाक् सन्धिः। जिह्वा सन्धानम्। इत्यध्यात्मम्॥[१]

---

[१] ऐतरेयोपनिषद् २/४
[२] छान्दोग्योपनिषद् ३/१३/३
[३] छान्दोग्योपनिषद् ५/७/१

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

छान्दोग्योपनिषदि व्यानवायुर्वाक् कथ्यते, तथा प्राणापानयोर्सन्धिरूपा प्रोक्तास्ति। यतो हि जनाः प्राणनक्रियामपाणनक्रियाञ्चाकृत्वैव वाणीमुच्चारयन्ति ;-

यो व्यानः स वाक्। तस्मादप्राणन्ननपानन्वाचमभिव्याहरति।[२]

कौषीतकिब्राह्मणोपनिषद्यप्युक्तमस्ति यत् प्राणापानवाग्वोः एवं वाचि परस्परमेतादृशः सम्बन्धो वर्तते, यदैकस्य प्रयोगावस्थायां द्वितीयोत्सर्गो भवति ;-

यावद्वै पुरुषो भाषते न तावत्प्राणितुं शक्नोति प्राणं तदा वाचि जुहोति। यावद्वै पुरुषः प्राणिति न तावद्भाषितुं शक्नोति वाचं तदा प्राणे जुहोति।[३]

अस्यामेवोपनिषदि प्राणवायुं ब्रह्मरूपं मत्वा वागपि तत्समा कथितास्ति ;-

प्राणो ब्रह्मेति ह स्माह कौषीतकिस्तस्य ह वा एतस्य प्राणस्य ब्रह्मणो दूतं वाक्परिवेष्ट्री चक्षुर्गोप्तृ॥[४]

बृहदारण्यकोपनिषदि कथितमस्ति यत् "वागेव" अत्तिरस्ति, यतो हि वागेन्द्रियेणैवान्नभक्षणं क्रियते ;-

वागेवात्तिर्वाचा ह्यन्नमद्यतेऽत्तिर्ह वै नामैतद्यदत्तिरिति सर्वस्यात्ता भवति सर्वस्यान्नं भवति॥[५]

बृहदारण्यकोपनिषदि वाचं धेनु कथयतास्य दिव्यस्वरूपवर्णनं कृतमस्ति ;-

वाचं धेनुमुपासीत तस्याश्चत्वारः स्तनाः स्वाहाकारो वषट्कारो हन्तकारः स्वधाकारस्तस्यै द्वौ स्तनौ देवा उपजीवन्ति स्वाहाकारं च वषट्कारञ्च हन्तकारं मनुष्याः स्वधाकारं पितरस्तस्याः प्राण ऋषभो मनो वत्सः॥[६]

---

[१] तैत्तिरीयोपनिषद् १/३/४
[२] छान्दोग्योपनिषद् १/३/३
[३] कौषीतकिब्राह्मणोपनिषद् २/१५
[४] कौषीतकिब्राह्मणोपनिषद् २/१
[५] बृहदारण्यकोपनिषद् २/२/४
[६] बृहदारण्यकोपनिषद् ५/८/१

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अर्थात् वाग्धेनोश्चत्वारः स्तनाः स्वाहाकारः, वषट्कारः, हन्तकारः, स्वधाकारश्च सन्ति। अस्या वाग्धेनोर्वृषभः प्राणः कथ्यते तथा मनोऽस्या वत्सो प्रोच्यते।

वाचः कृते बृहदारण्यकोपनिषदि "वसिष्ठा" इत्यभिधानमपि क्रियते यतो हि इयमतिशयेन वसति वासयति वा ;-

वाग्वै वसिष्ठा। वासयत्यतिशयेन वस्ते वेति वसिष्ठा।[१]

तैत्तिरीयोपनिषद्प्रथमवल्लीतृतीयानुवाकव्याख्यायामुदितमस्ति यत् वाचि विलक्षणा शक्तिर्वर्तते। वाचा प्रार्थनां कृत्वा मानवेन शरीरपोषणं तस्योन्नतेः सर्वाः सामग्र्यश्च प्राप्तुं शक्यन्ते, तथा ओङ्कारजपेन परमात्मानं प्राप्तुं शक्नोति। एवं प्रकारेण वाचि शारीरिकात्मविषयकमुन्नतेर्सामर्थ्यं वर्तते। रहस्यमेतज्ज्ञात्वा यो मानवो वाग्शक्तेः यथायोग्यमुपयोगं करोति। सः सर्वाण्यभीष्टफलानि प्राप्तुं समर्थो भवति।

छान्दोग्योपनिषदा पुरुषसारो "वाक्" इत्यभिधीयते ;-

पुरुषस्य वाग्रसः॥[२]

मुण्डकोपनिषद्युदितमस्ति यत् वेदा अपि वाच एव विवृता जाता :-

वाग्विवृत्ताश्च वेदाः॥[३]

छान्दोग्योपनिषदि वाग् सर्वव्यापिनी, वागेव गायत्रीत्यभिहितमस्ति। लोकस्य स्थावरजङ्गमाः प्राणिनः वागेव। एवं प्रकारेण वागेव सर्वभूतमयी वर्तते ;-

गायत्री वा इदं सर्वं भूतं यदिदं किञ्च वाग्वै गायत्री वाग्वा सर्वं भूतं गायति च त्रायते च॥[४]

विवेचनेनैतदुपनिषत्सु वाक्-तत्त्वस्यात्यधिकं महत्त्वपूर्णं स्थानं परिलक्षितं भवति। प्रस्तुतौपनिषदिकविवेचनेन वाचः विशदस्वरूपम् एवं कार्याणां सम्यक् बोधो

---

[१] बृहदारण्यकोपनिषद् ६/१/२ शाङ्करभाष्यम्
[२] छान्दोग्योपनिषद् १/१/२
[३] मुण्डकोपनिषद् २/१/४
[४] छन्दोग्योपनिषद् ३/१२/१

CC-0. Nepal Sanskrit Academy. Kathmandu Collection

भवति। प्रमुखोपनिषत्सु वाग् ब्रह्मस्वरूपा, अग्निस्वरूपा, विश्वस्य प्राणिनां मार्गप्रशस्तकारिणी, मानवेषु विराजमाना देवता, प्रकाशिका शक्तिश्च सम्बोधितास्ति। वेदानां साररूपा वागेव कथिता वर्तते। एषा ब्रह्मज्ञानिनां जिज्ञासूनाञ्च कृते साध्यं साधनञ्च वर्तते। वाक् मानवीयचेतनायाः रूपात्मिका निर्देशिका वर्तते। अस्या आधारेणैव प्रत्येकं जीवे स्वान्तःकरणस्यैवं बाह्यजगतो व्यवहारो निर्भरति। शब्दतत्त्वमिदं प्रत्यक्कैतन्येऽभिन्नतया अन्तःसन्निविष्टमस्ति । परसम्बोधनार्थम् इदमेव वाक्तत्त्वं वैखर्या वाचाभिव्यक्तं भवति। उपनिषत्सु वर्णितमस्ति यत् वाक्तत्त्वस्य वस्तुस्वरूपस्य यथार्थज्ञानमेव निःश्रेयसप्रदायकं तत्त्वज्ञानमस्ति। मैत्रायणी-उपनिषदि प्रोक्तमस्ति यत् यः शब्दतत्त्वं जानाति, तेन शब्दतत्त्वज्ञेन परब्रह्म स्वतः लभ्यते ;-

द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च यत्।
शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति॥[१]

डॉ. सन्तोष कुमार शुक्लः
सहाचार्यः, विशिष्टसंस्कृताध्ययनकेन्द्रम्,
जवाहरलाल नेहरू विश्वविद्यालयः, नवदेहली-६७

ठाकुर शिवलोचन शाण्डिल्यः
शोधच्छात्रः, विशिष्टसंस्कृताध्ययनकेन्द्रम्,
जवाहरलाल नेहरू विश्वविद्यालयः, नवदेहली-६७

[१] मैत्रायणी-उपनिषद् ६/२२

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अङ्क-२३
जनवरी-जून २०१४

वेदविद्या
ISSN-2230-8962

यज्ञानां वैज्ञानिकता

अशोक कुमार मिश्र

वैदिकवाङ्मये ऋग्यजुस्सामाथर्ववेदेभ्यो ब्राह्मणारण्यकोपनिसत्पुराणस्मृतिं यावत् सर्वत्र मूलतः सृष्टितत्त्वानां प्रमुखविचारास्सुलभाः। सृष्टिप्रक्रियायाः विशदत्वादस्या उपजीव्यत्वादन्येषां ग्रन्थानां संरचना भवितुमर्हति। सन्दर्भेऽस्मिन् महामहोपाध्यायैः विद्यावाचस्पतिभिः मधुसूदनओझा महोदयैः ब्रह्मसिद्धान्तब्रह्मविनयब्रह्मसमन्वय-महर्षिकुलवैभवयज्ञसरस्वतीप्रभृतयः नैके ग्रन्थाः संरचिताः। विश्वस्य मूलसत्ता ज्ञानमस्ति। तथा अस्य ज्ञानस्य जगतो विभिन्नभावेषु विजृम्भणं विज्ञानमस्ति। विष्णुपुराणे उच्यते -

ज्ञानस्वरूपो भगवान् यतो साऽवशेषमूर्तिर्न तु वस्तुभूतः।
ततो हि शैलाब्धिधरादिभेदान् जानीहि विज्ञानविजृम्भितानि॥[१]
महीघटत्वं घटतः कपालिका कपालिका चूर्णरजस्ततोऽणुः।
जनै स्वकर्मास्तिमिलात्यनिश्चयैः आलक्ष्यते ब्रूहि किमत्र वस्तु॥[२]
तस्मान्न विज्ञानमृतेऽस्ति किञ्चित् क्वचित् कदाचित् द्विजवस्तुजातम्।
विज्ञानमेकं निजकर्मभेद विभिन्नचित्तैर्बहुधाप्युपेतम्॥[३]

ज्ञानरूपस्य भगवतो मूर्तय एव सर्वे पदार्थाः न तु स्वयं पदार्थरूपाः। तस्मात्तस्य भगवतो विज्ञानरूपे विविधरूपेषु शोभायमानाः। तद्यथा-शैलभूमिसागरवृक्षनदी-प्रभृतयः सन्तीति वेदितव्यम्। मृत्तिका घटेषु विपरिणमते, घटाः कपालखण्डेषु, कपालखण्डाः पांसुलेषु, पांसवः अणुरूपेषु परिवर्तन्ते। स्वकर्मतन्त्रेण प्रवणमन-निश्चयानुसारमेव जनाः इमान् पश्यन्ति।

---

[१] वि.पु. २/१२/३९
[२] वि.पु. २/१२/४२
[३] वि.पु. २/१२/४३

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एषु सत्स्वरूपवस्तु किमस्ति? किञ्च तद्विज्ञानमिति चेत् अत्रेत्थं वोध्यम्। विज्ञानरूपे अस्य ज्ञानस्यागमनं येन क्रियासमूहेन सम्भवति तन्नाम विज्ञानमस्ति। प्रकारेणानेन विज्ञानरूपं स्वरूपतो द्विविधार्थविशेषं वोधयति-कर्मविस्तारतन्त्रं यज्ञविस्तारतन्त्रञ्च। तैत्तिरीयोपनिषदि उच्यते -

विज्ञानं यज्ञं तनुते कर्माणि तनुतेऽपि च।
विज्ञानं देवाः सर्वे ब्रह्मज्येष्ठमुपासते॥[१]

अस्यैव सुस्पष्टीक्रियते भृगुवल्ल्याम् -

"विज्ञानाद् हि एव खलु इमानि भूतानि जायन्ते; विज्ञानेन जातानि जीवन्ति। विज्ञानं प्रयन्ति अभिसम्विशन्ति।"[२]

यज्ञस्य वैज्ञानिकता अनेन सुस्पष्टयते। श्रीमद्भगवद्गीतायामपि विज्ञानमूलक-कर्ममययज्ञः तेन यज्ञेन सृष्टेरुद्भवः इति ब्रह्मणा प्रतिपादितम् -

सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः।
अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक्॥[३]

सृष्टेरादौ यज्ञस्य सृष्टिः तथा च यज्ञसाहाय्येन प्रजां सृष्ट्वा प्रजापतिरवोचत् यत् हे प्रजाः! यूयमनेन यज्ञविज्ञानेन अशेषां सृष्टिं विस्तारयध्वम्। एतद् यज्ञविज्ञानं युष्माकं कृते मनसेप्सितं शास्त्रीयं फलं धोक्ष्यति। अयं भावः प्रजासर्गः यज्ञसर्गश्च ईश्वरस्य महान् आविष्कारो सञ्जायत इति विद्वन्मण्डले यत्र तत्र गोष्ठ्यां चर्चा भवति।

सृष्टेरादौ सर्गोत्पन्नः तदनु कर्मविज्ञानं किन्तु याथातथ्येन समीक्षणं क्रियते चेत् उभयोः (कर्मसर्गयोः) समाना स्थितिः समश्च कालः प्रतीयते इदमुद्धरणं भगवति वेदे वाजसनेयसंहितायां मन्त्रमाध्यमेन प्राप्यते। यथा -

---

[१] तै.उ.ब्र.व. ५
[२] तै.उ.भृ.व. ५
[३] भ. गी. ३/१०

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

देव॑ सवितः प्रसु॑व य॒ज्ञं प्रसु॑व य॒ज्ञप॑तिं भगा॑य।
दि॒व्यो ग॑न्ध॒र्वः के॒तपू॒ः केत॑न्नः पुनातु वा॒चस्पति॒र्वाज॑न्नः स्वदतु स्वाहा॑॥[1]

परम्परायां मन्त्रोऽयं यज्ञार्थपरको विभाति। पुनः वैदिकविज्ञानालोके कश्चिद् विशिष्टोऽर्थोऽनुमीयते। तच्च सवितृशब्दः प्रेरणार्थकः प्रसवार्थकश्च। पुनश्च स्वस्वरूप-चिन्तनविधौ स च सविता प्रकाशमयो देवो ज्ञानमयश्चावलोक्यते। यथा - चाहोपनिषदि - "तमसो मा ज्योतिर्गमय" ज्योतिरित्यत्र ज्ञानम्। प्रकृतिमनुसरामि - हे देवसवितः ! यज्ञं प्रेरय यज्ञ इत्यत्र समस्तस्य सत्कर्मणो वाचकः अर्थात् जागतिकानि निखिलान्यपि सत्कर्माणि उत्पादय प्रेरय वा तदनु यज्ञपतिञ्च यज्ञपतिशब्दोऽप्यत्रानेकार्थकः यज्ञपतिः विष्णुः समग्रस्य प्रपञ्चस्याधीश्वरो यज्ञपतिः यजमानः कर्मसम्पादको वा। अत्र द्वितीयोऽर्थो विज्ञानस्य क्रमे विशिष्यते। आदौ कर्मप्रपञ्चं सम्भारं वा निगदयामास पुनः कर्मसम्पादकञ्च कथयामास। सः यजमानः सत्कर्मसम्पादनेन किञ्चिद्विशिष्टं फलमाप्नोति। तच्च फलं उदाहृते मन्त्रे 'भगाय' इति पदेनोपदिष्टम्। भगः ऐश्वर्यं यद्यपि विष्णुपुराणे भगपदमर्थापयन् भगवान् व्यासः आह-

ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः।
ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरिणा॥

यो हि मनुष्यः सत्कर्मसम्पादकः भवति स अचिरेणैव कालेन भगैरलङ्कृतो जायते। तथा सद्य एव भगवान् पदवाच्यो भवति। 'भग एव भगवान्' इति शुक्लयजुर्वेदस्य त्रयस्त्रिंशत्तमेऽध्याये उल्लिखितम्। यज्ञसम्पादनं यज्ञकर्त्रे फलमवश्यं यच्छति। दिव्यः दिवि भवः दिव्यः अलौकिको गन्धर्वो गां वेदवाचं धारयतीति गन्धर्वः, गानात् वा गन्धर्वः, सौम्यस्वरूपो गन्धर्वः देवयोनिविशेषः। केतं - ज्ञानं पुनातीति केतपूः एतद्विशेषणयुक्तो गन्धर्वः। अस्माकं कर्मकर्तृणां चित्तस्थं ज्ञानं पुनातु शोधयतु। वाचस्पतिः बृहस्पतिः नः अस्माकं ज्ञानमयं पावयितारं वाचं स्वदतु आस्वादयतु। अयमत्र विशेषः सामाजिकानां सकलोऽपि व्यवहारो वागधीनो वर्तते।

[1] शुक्लयजुर्वेदसंहिता ९.१

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यदि व्यवहारपक्षे सा वाक् शुद्धान्तःकरणेन विचारिता भवति तर्हि अवश्यमेव व्यवहरणीयो जनः प्रीतो भवति। वस्तुतः यज्ञः प्रजापतिरेवास्ति। समस्ताः सृष्टयः यज्ञेनैव भवन्ति। शतपथब्राह्मणेऽप्युच्यते -

"स देवेभ्य आत्मानं प्रदाय अथ आत्मनः प्रतिमां असृजत यद् यज्ञम्।
तस्मादाहुः प्रजापतिः यज्ञ इति आत्मनो हि एतं प्रतिमां असृजत।"[१]

एतेषां सर्वेषाम् आधारो वेद एवास्ति। अथर्ववेदे उक्तम् -

यज्ञो बभूव स आ बभूव स प्रजज्ञे स उ वावृधे पुनः।
स देवानामधिपतिर्बभूव सोऽस्मासु द्रविणामादधातु॥[२]

यज्ञः प्रजापतेः प्रतिमा अस्ति; प्रजापतिरस्ति; देवानामधिपतिरस्ति; स्वयं प्रजापतिरेव इष्टकामधुक् ज्ञापयति। इष्टानां कामानां पूर्त्तिः यज्ञमाध्यमेन भवतीति चर्चा। वेदब्राह्मणारण्यकपुराणादिग्रन्थेषु समुपलभ्यते। यथा - वैवस्वतमनुपरामर्शेन नाभानेदिष्ठः अङ्गिरसां सत्रे "षष्ठ अहः" इत्यस्य शस्त्रे समुद्भवानां भ्रान्तीनां निरसनञ्चकार। तेन साङ्गयज्ञस्य सम्पादने सति तान् स्वसङ्कल्पानुसारं स्वर्गं ददौ। इयमाख्यायिका ऐतरेयब्राह्मणस्य पञ्चमपञ्चिकायाः द्वितीयाध्यायस्य नवकण्डिकातः चतुर्दशकण्डिकापर्यन्तं वर्णिता अस्ति।

"देवक्षेत्रं वा एतद्यत्षष्ठमह ..... नाभानेदिष्ठशंसतिना॥"[३]

श्रीमद्भागवतमहापुराणे (९/४/१-१३) अस्याः आख्यायिकायाः अनुवादोऽस्ति। प्रकारेणानेन ऋग्वेदस्य दशममण्डलस्य द्विनवतितमस्य सूक्तस्य ऋषिः शर्यातिः अस्ति। एषां यज्ञकर्तृणामपि स्वर्गप्राप्तिरभवत्। वैवस्वतमनुः स्वपत्न्याः श्रद्धायाः सन्तानावाप्तये महर्षिणा वसिष्ठेन "मित्रावरुणेष्टि" यागेन दशपुत्राणां प्राप्तिरभवत्। इदमाख्यानं श्रीमद्भागवतमहापुराणे वर्णितमस्ति। यथा -

---

[१] श. ब्रा. ११/१/९/३
[२] अ. वे. ७/५/२
[३] ऐ.ब्रा. ५/९/११

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इक्ष्वाकुनृगशर्यातिदिष्टधृष्टकरूषकान्।
नरिष्यन्तं वृषध्रं च नभगं च कविं विभुः॥
अप्रजस्य मनोः पूर्वं वसिष्ठो भगवान् किल।
मित्रावरुणयोरिष्टिं प्रजार्थमकरोत् प्रभुः॥
तत्र श्रद्धा मनोः पत्नी होतारं समयाचत्।
दुहित्रर्थमुपागम्य प्रणिपत्य पयोव्रता॥
प्रेषितोऽध्वर्युणा होता ध्यायंस्तत् सुसमाहितः।
हविषि व्यचरत् तेन वषट्कारं गृणान् द्विजः॥[१]

एका आख्यायिका तैत्तिरीयसंहितायाः २/४/१२/२ शतपथब्राह्मणस्य च /६/३/७-१५; १/६/४/१-२१ तमे स्थले उद्धृतास्ति। इन्द्रेण विश्वरूपस्य वधे सति त्वष्टा इन्द्रवधसङ्कल्पेन वृत्रं जजान। अन्वाहार्यपचनेन वृत्रो यज्ञवेदिना समुद्भूतः। आभिः आख्यायिकाभिः ज्ञायते यत् यज्ञे देवताः प्रत्यक्षेणागत्य स्वीयं स्वीयं भागम्अगृह्णन्। मिथिलायां समागतरामलक्ष्मणविश्वामित्रञ्च प्रार्थयति जनकः -

यज्ञोपसदनः ब्रह्मन् प्राप्तोऽसि मुनिभिः सह। द्वादशाहं तु ब्रह्मर्षे शेषमाहुर्मनीषिणः॥ ततो भागार्थिनो देवान् द्रष्टुमर्हसि कौशिक॥[२]

यज्ञैः विविधप्रकाराणां नैकानि फलानि रामायणमहाभारतपुराणप्रभृतिवाङ्मयेषु वर्णितानि सन्ति। येषां मूलमपि वेदे निहितमस्ति -

यस्त्वा कृत्याभिर्यस्त्वा दीक्षाभिर्यज्ञैस्त्वा जिघांसति।
प्रत्यक् त्वमिन्द्र तं जहि वज्रेण शतपर्वणा॥[३]
ये ते पाशा एकशतं मृत्योर्मर्त्याय हन्तवे।
ताँस्ते यज्ञस्य मायया सर्वानवयजामहे॥[४]

---

[१] भागवत म. पु. ९/१२/१५
[२] वाल्मीकिरामायणम् बा. का. ५०/१५-१६
[३] अ.वे. ८/५/१५
[४] काठकसंहिता ३८/१४८

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यतो हि सृष्टिः यज्ञमूलिकाऽस्ति। अतएव यज्ञस्य ज्ञानं सृष्टिज्ञानमस्ति। अथर्ववेदे रहस्यमिदमुक्तमस्ति -

"एतस्माद् वा ओ दनात् त्रयस्त्रिंशतं लोकान् निरमितीत प्रजापतिः" ॥[१]

"तेषां प्रज्ञानाय यज्ञमसृजत॥"[२]

देवानां आप्यायनाय (वर्द्धनाय) यज्ञः क्रियते -

त्वमिन्द्रस्त्वं महेन्द्रस्त्वं लोकस्त्वं प्रजापतिः।

तुभ्यं यज्ञो वि तायते तुभ्यं जुह्वति जुह्वतस्तवेद विष्णो बहुधा वीर्याणि।

त्वं नः पृणीहि पशुभिर्विश्वरूपैः सुधायां मा धेहि परमे व्योमन्॥[३]

अत्र त्रिंशन्मन्त्राणां सूक्तेऽस्मिन् विंशतिमन्त्राणाम् अन्तिमः पादः "त्वं नः पृणीहि परमे व्योमन्" अस्ति। अनेन यज्ञेन मुक्तिप्राप्तेरपि स्पष्टज्ञानं भवति। इन्द्रस्य प्रवर्द्धनम्, पृथिव्याः विवर्तनञ्च यज्ञस्य कार्यमस्ति। स्पष्टरूपेणेदं विज्ञानमस्ति। सन्दर्भेऽस्मिन् सामवेदसंहितायामुल्लिखितम् -

यज्ञ इन्द्रमवर्द्धयद् यद् भूमिं व्यवर्तयत्। चक्राण ओपशम् दिवि॥[४]

विश्वकर्मणा यज्ञस्य वितानं क्रियते। सुमनस्यमानाः देवाः तस्मिन् यज्ञे स्वीयं भागग्रहणार्थम् आगच्छन्ति। अथर्ववेदे उक्तम् -

इमं यज्ञं विततं विश्वकर्मणा देवा यन्तु सुमनस्यमानाः॥[५]

यज्ञमिमं मायाऽपि उच्यते तैत्तिरीयसंहितायाम् - "तं निर्मायं भूतमहन् यज्ञो हि तस्य माया०"[६] प्रकृतिरपि माया अस्ति। अतएव प्रकृत्यामपि यज्ञः सर्वदा भवति। श्वेताश्वतरोपनिषद्युल्लिखितम् -

---

[१] अथर्व. ११/३/५२

[२] अथर्ववेदः ११/३/५३

[३] अथर्ववेदः सं. १७/१/१८

[४] सामवेदसंहिता पूर्वार्चिकं २२१, उत्तरार्चिकं १६३९

[५] अथर्ववेदसंहिता १९/५८/५

[६] तै. सं. ६/५/१/२

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मायां तु प्रकृतिं विद्यात् मायिनं तु महेश्वरम्।
तस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगत्॥[१]

प्रकारेणानेन अविद्याऽपि माया यज्ञो वा अस्ति।

विद्याश्च वा अविद्याश्च यच्चान्यद्उपदेश्यम्।
शरीरं ब्रह्म प्राविशदृचः सामाथो यजुः॥[२]

अयं यज्ञो विज्ञानमेवास्ति येन मृत्योस्तरति यो यजुर्वेदे अविद्याभिधानेन स्वीक्रियते -

"अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते॥"[३]

यज्ञं विश्वतोधारः समुच्यते। यज्ञवेत्तारः विश्तोधारयज्ञस्य विस्तारयन्ति। अथर्ववेदेऽप्युच्यते -

"यज्ञं ये विश्वतोधारं सुविद्वांसो वितेनिरे॥"[४]

सर्वा दिशः यस्य धाराः सन्ति; यः सर्वाभ्यः दिग्भ्यः धारकोऽस्ति सः विश्वतोधारः।

विश्वतोधारता यज्ञस्य तां व्यापकतां ज्ञापयति यस्य किञ्चित् सङ्केतं भगवता श्रीकृष्णेन श्रीमद्भगवद्गीतायां वर्णितम् -

द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे।
स्वाध्यायज्ञानयज्ञाश्च यतयः संशितव्रताः॥[५]
एवं बहुविधा यज्ञा विताता ब्रह्मणो मुखे॥[६]

---

[१] श्वेताश्वतरोपनिषद्, ४/१०
[२] अ.सं. ११/८/२३
[३] यजुर्वेदसंहिता ४०/१४
[४] अथर्ववेदसंहिता ४/१४/४
[५] भगवद्गीता ४/२८
[६] भगवद्गीता ४/३२

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अत्र भगवता श्रीकृष्णेन केषाञ्चित् यज्ञानां नामोल्लेखनं कृतम्। अन्ते च यज्ञस्य बहुविधत्वं ज्ञापयति। मनुना प्रतिपादितम्-यज्ञविधिमेव प्रजाः अगृह्णन् इति । शतपथब्राह्मणे उक्तम् - "मनुर्ह वा अग्रे यज्ञेनेजे तदनुकृत्येमाः प्रजाः यजन्ते॥"[१]

यज्ञस्य बहुधा कल्पना ऋग्वेदेऽपि दरीदृश्यते -

"यमृत्विजो बहुधा कल्पयन्तः सचेतसो यज्ञमिमं वहन्ति। यो अनूचानो ब्राह्मणो। युक्त आसीत् का स्वित् तत्र यजमानस्य संवित्॥[२]

मन्त्रेऽस्मिन् "सचेतसः" इत्यस्य पदस्य द्वावर्थौ स्तः बुद्धिसम्पन्नः समानचित्तस्कश्च । यज्ञस्य वैज्ञानिकता इत्यस्य सन्दर्भे नैकानि समुद्धरणानि वेदब्राह्मणारण्यकोपनिषद्पुराणप्रभृतिषु ग्रन्थेषु विद्यन्ते । आवश्यकता अस्ति तेषामध्ययनस्य।

डॉ. लम्बोदर मिश्रः
सह-आचार्यः वेदः,
जगद्गुरुः रामानन्दाचार्यराजस्थानसंस्कृतविश्वविद्यालयः,
जयपुरम् (राज.)

[१] शतपथब्राह्मणम् १/५/१/७
[२] ऋ.सं. ८/५८/१

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अङ्क-२३
जनवरी-जून २०१४

वेदविद्या
ISSN-2230-8962

वर्णानुक्रमेणोपनयनकालविमर्शस्तत्प्रयोजनञ्च

डॉ. चूडामणिःत्रिवेदी

यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत् सहजं पुरस्तात् ।
आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः ॥

इति मन्त्रोक्तगुणोपेतस्य यज्ञोपवीतस्य धारणार्थं त्रैवर्णिकानाम् अधिकारो वर्त्तते। अस्य धारणस्य कालविशेषः शास्त्रेषु भृशं समुपवर्णित अस्ति। अस्य कृते श्रुतिस्मृति-पुराणप्रभृतिधर्मग्रन्थेषु वर्णितेषु षोडशसंस्कारेषूपनयनसंस्कार अन्यतमः। उपनयनं वैदिकयुगादेव प्रसिद्धं कर्म इदं हि कर्मातिमहत्त्वपूर्णं वर्त्तते । अनेनैव कर्मणा 'द्विज' इति व्यपदेश्या ब्राह्मणक्षत्रियवैश्याः[१]। अतः कर्मैतत् अतितमं प्रमुखम् । अत्रैव कर्मणि सावित्रीदीक्षा द्विजेभ्यो दीयते । इयं हि सावित्री सकलशास्त्रसारभूता[२], तस्याः अत्र कर्मणि दीक्षया इदं कर्मापि महत्। दीक्षायाः प्रकारान्तरेण विधानं प्रायः सर्वत्र दरीदृश्यते। क्वचन असभ्यसमाजे सहनशक्तिपरीक्षणक्रमेण युवा माणवकः समाजे दीक्षितः क्रियते[३]। अन्यत्र च समाजे अस्थाय्येकान्तवासेन कन्या दीक्ष्यन्ते[४]। कस्मिंश्चिच्च वन्यसमाजे किमप्यङ्गं विनाश्य दीक्षाः प्रदीयन्ते[५]। इस्लामधर्मानुयायिनः यवनानान्त्वद्यापि शिश्नाग्रच्छेदः दीक्षितुं क्रियते तस्मिन् धर्मे यवनान्। अस्माकमुपनयनमिति दीक्षैव परा। परन्त्वत्र महती सांस्कृतिकी आध्यात्मिकी च

---

[१] मातुर्यदग्रे जायन्ते द्वितीयं मौञ्जिबन्धनात् ।
ब्राह्मणक्षत्रियविशस्तस्मादेते द्विजाः स्मृताः॥ या. स्मृ. १/३९

[२] त्रिभ्य एव तु वेदेभ्यः पादं पादमदूदुहत्।
तदित्यृचोस्याः सावित्र्याः परमेष्ठी प्रजापतिः॥ म. स्मृ. २/७७

[३] फ्रेजर गोल्डेन वाउ, पृ. ४४२

[४] फ्रेजर गोल्डेन वाउ, पृ. २०४

[५] हर्बर्टस्पेन्सर प्रिन्सिपुल्स ऑफ सोशियोलॉजि, १/१८९, २९०

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भावना प्रतिष्ठिता वर्तते। उपनयनं नाम यस्मिन् कर्मणि येन कर्मणा वा आचार्येण विद्यार्थं सुमुहूर्ते कुमारस्य स्वसमीपे नयनम् इति संस्कारतत्त्वमालायाम्[१]। अतो वक्तुं शक्यते यदुपनयनं सर्वथैव वैदिकं वैज्ञानिकञ्च कर्मेति। तत्र वर्षर्तुमासपक्षायनादि-भेदाद्विविधः कालो निर्णेतव्यः। महर्षिभिः एषु प्रथमं वर्षविषये कथ्यते -

तत्र वार्षिकः कालो द्विविधः नित्यः, काम्यश्च। नित्योऽपि द्विविधः-मुख्यः, गौणश्च भेदात्।

तत्र नित्य मुख्यकालमधिकृत्य विविच्यते -

१. **मुख्यकालः** - द्विजातीनां कृते उपनयनस्यानुष्ठानकालो भिन्नो भिन्नो वर्तते। ब्राह्मणकुमारस्योपनयनम् अष्टमे वर्षे, क्षत्रियस्यैकादशे वर्षे, वैश्यस्य द्वादशे वर्षे अनुष्ठेयम्। अयं हि कालः श्रुतिसम्मतो वर्त्तते -

"अष्टवर्षं ब्राह्मणमुपनयीत एकादशवर्षं राजन्यं द्वादशवर्षं वैश्यमिति।"[२]

बौधायनादयः गर्भादिः सङ्ख्या वर्षाणामित्यनुमन्यन्ते। धर्मशास्त्रे उभयविधा वर्षगणना प्रसिद्धा वर्त्तते। अतः सिद्धं यत् गर्भतो जन्मतो वा अष्टमे वर्षे ब्राह्मणस्य, एकादशे वर्षे क्षत्रियस्य, द्वादशे वर्षे च वैश्यस्योपनयनमनुष्ठेयम्। याज्ञवल्क्यः उभयविधां वर्षगणनां समर्थयति -

गर्भाष्टमेऽष्टमे वाऽब्दे ब्राह्मणस्योपनायनम्।
राज्ञामेकादशे सैके विशामेके यथाकुलम्॥[३]

कात्यायनादयः सप्तमे ब्राह्मणस्य, दशमे क्षत्रियस्य, एकादशे वैश्यस्य उपनयनमुपादिशन् - "सप्तमे वर्षे ब्राह्मणस्योपनयनम्। दशमे राजन्यस्य। एकादशेवैश्यस्य॥"[४] तत्र गर्भादिः वर्षगणना प्रतीयते। यतो गर्भतोऽष्टादि वर्षाणि

---

[१] सं. र. मा., पृ. १६४
[२] सं. प्र., पृ. ३४०
[३] या. स्मृ. १/१४
[४] उद्धृतम्, सं. त. स., पृ. १५४

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्वीकुर्याम चेत् जन्मतः सप्तमादिवर्षाण्येव सिध्येरन्। कालोऽयं मुख्यः कालो मन्यते।

२. **गौणकालः** - मुख्यकालस्य बाधे जाते सति आचार्या गौणकालम् उपादिशन्। स च कालो मुख्याभाव एव स्वीकार्यः। तत्र षोडशवर्षं यावत् ब्राह्मणस्य, द्वाविंशतिवर्षं यावत् क्षत्रियस्य, चतुर्विंशतिवर्षं यावत् वैश्यस्योपनयनस्य गौणकालो भवति। उक्तं गोभिलेन - **"आषोडशाद्वर्षात् ब्राह्मणस्यानतीतः कालो भवति, आद्वाविंशात् क्षत्रियस्य, आचतुर्विंशाद् वैश्यस्य"**[१]। इयं च वर्षगणना गर्भादिः वर्त्तते।

३. **काम्यकालः** - यदि कश्चिद् विप्रो ब्रह्मवर्चसकामो वर्त्तते तर्हि तस्योपनयनं पञ्चमे वर्षे विधेयम्। बलार्थिनः क्षत्रियस्योपनयनं षष्ठे वर्षे, बहुकृष्यादिचेष्टकामस्य वैश्यस्योपनयनम् अष्टमे वर्षे विधेयमिति सामान्यः सिद्धान्तः। उक्तं मनुना -

ब्रह्मवर्चसकामस्य कार्यं विप्रस्य पञ्चमे।
राज्ञो बलार्थिनः षष्ठे वैश्यस्येहार्थिनोऽष्टमे ॥[२]

तत्र धर्मशास्त्रे विभिन्नाः कामना आश्रित्य क्रियमाणस्योपनयनस्य भिन्नभिन्नः कालोऽवलोक्यते। तथापि आपस्तम्बबौधायनाभ्यां त्रैवर्णिकाणां कृते उपनयनस्य अग्रलिखिताः समानाः काम्यकालाः[३] प्रतिपादिताः सन्ति -

ब्रह्मवर्चसकामः	=	सप्तमे वर्षे
आयुष्कामः	=	अष्टमे वर्षे
तेजस्कामः	=	नवमे वर्षे
अन्नाद्यकामः	=	दशमे वर्षे
इन्द्रियकामः	=	एकादशे वर्षे
पशुकामः	=	द्वादशे वर्षे
मेधाकामः	=	त्रयोदशे वर्षे

[१] गो.गृ. २/१०/३
[२] मनु.स्मृ. २/३७
[३] आप.धर्म. १/१/२०-२६, बौ.गृ. २/५/५

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पुष्टिकामः	=	चतुर्दशे वर्षे
भ्रातृव्यकामः	=	पञ्चदशे वर्षे
सर्वकामः	=	षोडशे वर्षे

व्रात्याः

द्विजस्योपनयनकालो यदाऽतिक्रान्तो भवति तदा स सावित्र्युपदेशानर्हो भवति। मनुना उक्तम् -

अत ऊर्ध्वं त्रयोऽप्येते यथाकालमसंस्कृताः।
सावित्रीपतिता व्रात्या भवन्त्यार्यविगर्हिताः ॥
नैतैरपूतैर्विधिवदापद्यपि हि कर्हिचित्।
ब्राह्मान् यौनांश्च सम्बन्धानाचरेद् ब्राह्मणः सह ॥[१]

अर्थात् धर्मशास्त्रैः अभिमतान् मुख्यगौणकाम्यादीन् सकलानपि उपनयनकालान् यदि द्विजोऽतिक्राम्येत् तर्हि स सावित्रीपतितः, व्रात्यः, सभ्यसमाजात् गर्हितश्च जायते। स पतितसावित्रीक इत्युपाधीयते। पारस्करोऽपि प्रत्यपादयत् - "**अत ऊर्ध्वं पतितसावित्रीका भवन्ति। नैनानुपनयेयुर्नाध्यापयेयुर्न याजयेयुर्न चैभिर्व्यवहरेयुः॥**"[२] एते व्रात्याः सर्वेभ्योऽपि कर्मभ्यो विवर्जिता भवन्ति। एतेषाम् अध्यापनं, यागादिकं सर्वं वर्जितं भवति। एते विवाहादिसम्बन्धयोग्या अपि न भवन्ति। वेदाध्ययने अधिकारच्युतत्वात् एते शूद्रतुल्या एवाभिधीयन्ते[३]।

व्रात्यानामुपनयने प्रायश्चित्तम् - एवंविधाः पतितसावित्रीकाः प्रायश्चित्तमाचर्य उपनयनसंस्कारार्हा भवन्ति।

---

[१] म.स्मृ. २/३९-४०
[२] पा. गृ. २/२
[३] न ह्यस्मिन् युज्यते कर्म किञ्चिदामौञ्जिबन्धनात्।
नाभिव्याहारयेद् ब्रह्म स्वधानिनयनाद्दते ।
शूद्रेण हि समस्तावद् यावद्वेदे न जायते ॥ म. स्मृ. २/१७१-१७२

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

"तेषां संस्कारेप्सुर्व्रात्यस्सेमेनेष्ट्वा काममधीयीरन्॥"[१]

अर्थात् व्रात्यस्तोमयज्ञानुष्ठानेन व्रात्या वेदाध्ययनाधिकारं पुनर्लभन्ते । अनेन ज्ञायते यत् कतिपयानि निश्चितव्रतानि अनुष्ठीय व्रात्याः पुनः वैदिकधर्मे प्रवेशमार्हन्। ब्राह्मणस्य षोडशवर्षं यावत् उपनयनकालो विहितो वर्त्तते। तत ऊर्ध्वं तस्योपनयनं कर्त्तव्यं चेत् तदा स विविधेषु वर्षेषु भिन्नभिन्नानि प्रायश्चित्तानि कुर्यात्। तद्यथा -

१. **सप्तदशे वर्षे** - व्रात्यः सशिखं वपनं कुर्यात्। स एकविंशतिरात्रं प्रसृतियावकं पिबेत्। ततः स पञ्च सप्त वा ब्राह्मणान् भोजयेत्। इत्थं यावकशुद्धस्य तस्योपनयनं कर्त्तव्यम्।[२]

२. **अष्टादशे वर्षे** - व्रात्यः प्राजापत्यत्रयं कुर्यात्। प्राजापत्यं द्वादशदिनानि प्रवर्त्तते, येषु दिनत्रयावधि प्रातःकालीनं भोजनम्, दिनत्रयं सान्ध्यभोजनम्, दिनत्रयम् अयाचितभोजनम्, अन्तिमदिनत्रयं चोपवासमात्रं विधीयते। उक्तं मनुना -

त्र्यहं प्रातस्त्र्यहं सायं त्र्यहमद्यादयाचितम्।
त्र्यहं परं च नाश्नीयात् प्राजापत्यं चरन्द्विजः॥[३]

३. **एकोनविंशे वर्षे** - व्रात्यः अग्नीन्धनम्, अध्ययनं, गुरुशुश्रूषां च विहाय अन्यत् सर्वं ब्रह्मचर्यधर्मं मासद्वयमाचरेत्। ततस्तस्योपनयनं कर्त्तव्यम्।[४]

४. **विंशे वर्षे** - व्रात्यो मनूक्तम् उपपातकसामान्यप्रायश्चित्तं मासत्रयं समाचरेत्। व्रात्यः सशिखं मुण्डितशिराः लूनश्मश्रूश्च एकमासावधिशिथिलयवागूरूपेण यवान् पिबेत्। ततो मासद्वयं कृत्रिमलवणवर्जितं हविष्यान्नम् एकदिनं प्रातःकाले द्वितीयदिने सायङ्काले इत्यनेन क्रमेण अश्नीयात्। ततः स पुनः संस्कारमर्हति।[५]

---

[१] पा. गृ. २/५/५४
[२] यमः, मिताक्षरा, ३/२६५
[३] म. स्मृ. ११/२११
[४] आप. धर्म. १/१/२८-२९
[५] गो.गृ.टि., पृ. ४५८

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

५. **एकविंशे वर्षे** - व्रात्यः चातुर्मासिकम् उद्दालकव्रतं समाचरेत्। उद्दालकव्रतं[१], यथा - व्रात्यः द्वौ मासौ यावकस्य आहारं कुर्यात्। ततः एकमासं पयः पिबेत्। ततः एकं पक्षं दध्ना वर्त्तयेत्। ततः सप्तरात्रं घृतेन, ततःषड्रात्रम् अयाचितेन, ततश्च जलेन त्रिरात्रं वर्त्तयेत्। पुनः अहोरात्रम् उपवासं कुर्यात्। तदूर्ध्वं स उपनयनसंस्कारार्हो भवति।

६. **द्वाविंशे वर्षे** - व्रात्यः अश्वमेधावभृथं गच्छेत्।

७. **त्रयोविंशे वर्षे** - व्रात्यः व्रात्यस्तोमाख्यस्य क्रतोः अनुष्ठानं कुर्यात्। उपर्युक्तावधौ ब्राह्मणस्य प्रायश्चित्तानि तत्रोक्तानि। एवमेव क्षत्रियवैश्ययोरपि द्वाविंशत् चतुर्विंशाच्च ऊर्ध्वम् उपर्युक्तक्रमेणैव प्रायश्चित्तानि ज्ञेयानि।

उपनयनस्य शुभः कालः

उपनयनसंस्कारः उत्तरायणेऽनुष्ठेयः।[२] वैश्यानामुपनयनं दक्षिणायनेऽपि कर्त्तुं शक्यते।[३] तत्र ब्राह्मणस्य वसन्तर्त्तौ, क्षत्रियस्य ग्रीष्मर्तौ, वैश्यस्य चोपनयनकालः शरदृतौ भवति।[४]

मासाः

सामान्यतः सर्वेषां द्विजातीनाम् उपनयने माघादारभ्य आषाढावधि उत्तरायणस्य षण्मासाः प्रशस्ताः सन्ति।[५] परन्तु बृहस्पतेः मतानुसारं ब्राह्मणस्य उपनयनाय आषाढमासोऽधमो वर्त्तते।[६] अवशिष्टेषु पञ्चसु मासेष्वपि चैत्रमासो ब्राह्मणस्य कृते उत्तमो वर्त्तते। बृहस्पतिः अन्येषु गुणेषु असत्स्वपि तस्य चैत्रमासिकम् उपनयनम् प्रशस्तं मन्यन्ते -

---

[१] बृहस्पतिः, सं. र. मा., पृ. १७०
[२] वृद्धगार्ग्यः, सं. प्र. पृ. ३५४
[३] मनु. स्मृ. ११/१०८-१०९
[४] नृसिंहः, पा. गृ. ग. भा. २/२, आश्व. गृ. १/४/१
[५] पा. गृ. ग. भा. २/२
[६] सं. र. मा., पृ. १७१

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गुरौ भृगौ नष्टगते च चैत्रे कार्यं न मङ्गल्यमनर्थकारि।
मीनस्थितेऽर्के खलु चैत्रमासे शुभप्रदं ब्राह्मणमौञ्जिबन्धः।।
गोचराष्टमवर्गाभ्यां गुरुशुद्धिर्न लभ्यते ।
तदोपनयनं कार्यं चैत्रे मीनगते रवौ ॥
शुक्रे नष्टे तथा जीवे दुर्बले चन्द्रभास्करे।
व्रतोपनयनं कार्यं चैत्रे मीनगते रवौ ॥
जीवभार्गवयोरस्ते सिंहस्थे देवतागुरौ।
मेखलाबन्धनं शस्तं चैत्रे मीनगते रवौ ॥
अतीवनष्टे सुरराजपूज्ये सिंहस्थिते वा द्विजपुङ्गवानाम्।
व्रतं प्रशस्तं खलु मासि चैत्रे कर्तुश्चिरायुः सुखसम्पदे स्यात्॥[१]

ज्येष्ठपुत्रस्योपनयनं विशेषेण ज्येष्ठमासे प्रतिषिद्धो वर्त्तते।

राजमार्त्तण्डे काम्यत्वेन मासानां निर्देशं विधाय तेषु उपनयनानुष्ठानस्य फलं[२] निरूपितम्। तद्यथा -

१. माघमासे उपनीतो महाधनो भवति।
२. फाल्गुनमासे उपनीतः प्रज्ञावान् भवति।
३. चैत्रमासे उपनीतो मेधावी भवति।
४. वैशाखमासे उपनीतो निखिलोपभोगयुतो भवति।
५. ज्येष्ठमासे उपनीतो महापण्डितो भवति।

सामान्यतो जन्ममासे उपनयनं नानुष्ठेयम्।[३] परमयं प्रतिषेधो वसन्तर्तौ अनुष्ठीयमाने उपनयने न भवति।[४]

---

[१] सं. प्र., पृ. ३५७
[२] तत्रैव, पृ. ३५४
[३] गर्गः-विवाहे मेखलाबन्धे जन्ममासं विवर्जयेत्। विशेषाज्जन्मपक्षं च वसिष्ठाद्यैरुदाहृतम्॥ सं. प्र., पृ. ३५८
[४] राजमार्त्तण्डः - वसन्तसमये दद्याद्ब्दे गर्भाष्टमेऽष्टमे ।
मेखलां जन्ममासेऽपि जन्मभे च तिथावपि ॥ सं. र. मा., पृ. १७२

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तिथयः

उपनयनाय शुक्लपक्षे द्वितीया, तृतीया, पञ्चमी, षष्ठी, सप्तमी, त्रयोदशी एतास्तिथयः प्रशस्ताः सन्ति।[१] तदभावे कृष्णपक्षेऽपि त्रयोदशीवर्जिता एता एव तिथयः प्रशस्ता मन्यन्ते। कृष्णपक्षे उपनेतुः चन्द्रप्रावल्ये सत्येव संस्कारो विधेयः।

तत्र धर्मशास्त्रे उपनयनाय सामान्यतः गुरुशुक्रयोः अस्तत्वम्, क्षीणचन्द्रः, अनध्यायः, गलग्रहाः, उपपदास्तिथय इत्यादयः कालाः प्रतिषिद्धा वर्त्तन्ते।

तिथिफलानि

विभिन्नासु तिथिसु अनुष्ठितस्योपनयनस्य अधोलिखितं[२] फलं भवति -

उपनयनतिथिः	-	फलम्
प्रतिपदा	-	मदिरासक्तः
द्वितीया	-	विद्वान्, मेधावी
तृतीया	-	नीतिज्ञः, मेधावी, शत्रुजित्
चतुर्थी	-	मन्दबुद्धिः, निरुत्साहः, दीनः, चपलः
पञ्चमी	-	धनवान्, दीर्घायुः, बुद्धिमान्
षष्ठी	-	अशुचिः
सप्तमी	-	नित्यरोगी
अष्टमी	-	अल्पायुः
नवमी	-	निर्धनः
दशमी	-	धनवान्
एकादशी	-	गुणवान्
द्वादशी	-	नीतिशास्त्रज्ञः

[१] सं. प्र. पृ. ३५९

[२] सिता ज्येष्ठे द्वितीया च आश्विने दशमी सिता ।
चतुर्थी द्वादशी माघे एताः सोपपदाः स्मृताः॥ सं. म. पृ. ५४

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

त्रयोदशी	-	शीघ्रमरणम्
चतुर्दशी	-	शीघ्रमरणम्
पूर्णिमा (पञ्चदशी)	-	शीघ्रमरणम्

दिवसाः

सामान्यतो रविवासरः, गुरुवासरः, शुक्रवासरश्चेति प्रशस्ता दिवसा वर्त्तन्ते।[१] सोमवासरोऽधमो वर्त्तते। मङ्गलबुधशनिवासरा मध्यमाः सन्ति। वराहेण ऋग्वेदिनाम् उपनयने गुरुवासरः, यजुर्वेदिनाम् उपनयने शुक्रवासरः, सामवेदिनाम् उपनयने मङ्गलवासरः, अथर्ववेदिनां चोपनयने रविवासरः प्रशस्तोऽभिहितः।[२]

वारफलानि

राजमार्त्तण्डे तत्तद्वारफलानि[३] सामान्यतः प्रतिपादितानि सन्ति -

१. रविवासरे उपनीतो मेधाम् अवाप्नोति।
२. सोमवासरे उपनीतो जाड्यम् अवाप्नोति।
३. मङ्गलवासरे उपनीतो मृत्युम् अवाप्नोति।
४. बुधवासरे उपनीतो बोधम् अवाप्नोति।
५. गुरुवासरे उपनीतः षट्कर्माभिरतिम्, सुखम्, विद्वत्वम्, दीर्घायुष्यं चावाप्नोति।
६. शुक्रवासरे उपनीतो मृत्युम् अवाप्नोति।
७. शनिवासरे उपनीतो मृत्युम् अवाप्नोति।

नक्षत्राणि -

प्रशस्तनक्षत्राणि-अश्विनी, रोहिणी, मृगशिरा, पुनर्वसुः, पुष्यः, उत्तरफाल्गुनी, हस्त, चित्रा, स्वाती, अनुराधा, उत्तराषाढा, श्रवणः, धनिष्ठा, उत्तराभाद्रपदा, रेवती।[४] यदि कथञ्चित् विहितनक्षत्रासम्भवे उपनयनमनुष्ठेयं चेत् मघा, कृत्तिका, विशाखा,

---

[१] बादरायणः, सं. प्र. पृ. ३६३
[२] मदनपरिजातः, पा. गृ. ग. भा. २/२
[३] सं. प्र. पृ. ३६५
[४] तत्रैव

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ज्येष्ठा, भरणी-शतभिषगित्येतानि नक्षत्राणि विहाय अन्यनक्षत्रेषु उपनयनं कार्यमिति संस्कारप्रकाशे व्यवस्था वर्त्तते।[१]

योगाः -

शुभा योगा उपनयने प्रशस्ता भवन्ति। उपनयनार्हस्य कुण्डल्यां चन्द्रगुरू बलबन्तौ स्याताम्। बृहस्पतिः ज्ञानस्य सुखस्य च प्रातिनिध्यं भजते। अतस्तस्य उदयत्वं बलत्वं च सुतरामपेक्ष्यते।[२]

डॉ. चूडामणिःत्रिवेदी
असिस्टेण्ट प्रोफेसरः,
संस्कृतं, दर्शनम् एवं वैदिक-अध्ययनविभागः,
वनस्थली विद्यापीठम्, राजस्थानम् ३०४०२२

[१] हेमाद्रिः, नि. सिं. पृ. ५४७
[२] सं. प्र. पृ. ३६९

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अङ्क-२३
जनवरी-जून २०१४

वेदविद्या
ISSN-2230-8962

वैदिकसंस्कृतवाङ्मये पर्यावरणम्

डॉ. अनिल प्रताप गिरिः

वेदा खलु ज्ञानराशयः । विविधविद्यानां, सकलशास्त्राणां, सर्वधर्माणां, विश्वसंस्कृतीनां, विभिन्नदर्शनानां कमनीयकलानां च स्रोतांसि वेदेषु प्राप्यन्ते ।

वेदशब्दार्थः विद् ज्ञाने इति धातोः घञि प्रत्यये कृते सति 'वेद' शब्दः सिध्यति। धातुपाठेऽन्येऽपि बहवः 'विद् धातवः' । उक्तं च मनुना-'वेदोऽखिलो धर्ममूलम्' ।

यः कश्चित् कस्यचिद् धर्मो मनुना परिकीर्तितः ।
स सर्वोऽभिमतो वेदे सर्वज्ञानमयो हि सः ॥[१]

वेदशब्दस्य विवेचनम्

यथा - "वेद्यन्ते ज्ञायन्ते लभन्ते वा धर्मादिपुरुषार्थः एभिरिति वेदाः"। वेदानाम् उल्लेखो यथा - ऋग् - यजुः - सामाथर्वणनामधेयाः ।

१- सायणाचार्येण वेदशब्दव्युत्पत्तिः लिखितं चेत् -

"इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति सः वेदः"।[२] अर्थात् अनिष्ट परिहार पुरस्सरम् इष्टप्राप्तेः लौकिकं प्रकारं यो वेदयति सः वेदः ।

२- महर्षि दयानन्दानुसारमपि यथा -

'विदन्ति, जानन्ति, विद्यन्ते, भवन्ति सर्वाः सत्यविद्या येषु वा तथा विद्वांसश्च भवन्ति ते वेदाः' ।[३] सर्वमतावलम्बिनः प्राच्याः पाश्चात्याश्च विद्वांसः एकमत्या स्वीकुर्वन्ति यद् वेदा अखिलविद्यानाम् आकारभूता विराजन्ते । अतएव वेदानाम्

---

[१] मनुस्मृतिः २/७
[२] कृष्णयजुर्वेदस्य भाष्यभूमिकायाम् ।
[३] ऋग्वेदभाष्यभूमिकायाम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अपौरुषेयत्वं सुप्रसिद्धम्। परन्तु वेदानां कालनिर्णयविषये सार्वत्रिकाः पृथक् - पृथक् प्रमाणमाश्रित्य परस्परं विवदमानाः दृष्टिपथमायान्ति । अस्मिन् विषये विदुषां न ऐकमत्यम् । इदं सर्वे स्वीकुर्वन्ति - यद् वेदा अस्माकं धर्मग्रन्थत्वेन आकारग्रन्थत्वेन च विराजन्ते इति । वसुधातले सत्यं वद, धर्मं चर, मातृदेवो भव, पितृदेवो भव, आचार्यदेवो भव, अतिथिदेवो भव, इत्याद्युपदेशश्रृङ्खला वेदानामेव चिरात् जागर्ति । अतो न केवलम् आर्यवंशीया, भारतीया एव वेदं प्रणमन्ति अपि तु अन्यधर्मावलम्बिनो विजातीया विदेशीया अपि वेदान् तथैव समादृतान् कुर्वन्ति ।

वेदानाम् उपवेदनामानि यथा -

ऋग्वेदः - आयुर्वेदः, सामवेदः - गान्धर्ववेदः, यजुर्वेदः - धनुर्वेदः, अथर्ववेदः इत्यादयः । वेदाङ्गत्वेन विख्याताः यथा - शिक्षा, कल्प, व्याकरणं, निरुक्तं, छन्दो, ज्योतिषञ्च । एतेषाम् उपाङ्गानि यथा- पुराणानि, न्यायशास्त्रम्, मीमासाशास्त्र, धर्मशास्त्रादीनि च ।



उपवेदः - आयुर्वेदः धनुर्वेदः गन्धर्ववेदः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वेदे पर्यावरणविज्ञानम्

किं पर्यावरणम् ?

पर्यावृतिः पर्यावरणम् । यत् परितः आवृणोति आच्छादयति तत् पर्यावरणम्। ये मानवं परितः आच्छादयन्ति, मानवजीवनं च प्रभावयन्ति, ते पर्यावरणशब्देन गृह्यन्ते । पर्यावरणं भौतिक-जैविकतत्त्वानां सङ्कलनेन भवति । भौतिकतत्त्वेषु मृत्तिका, जलम्, वायुः, प्रकाशश्च सन्ति । जैविकतत्त्वेषु समस्त-जीव-जगद्-वृक्ष-वनस्पतयश्च सन्ति ।

प्रथमं यज्ञमहिमानं विचारयामः

यज्ञो वैदिकसंस्कृताङ्गभूतेषु तत्त्वेषु प्राधान्यं भजते । वेदेषु यज्ञादीनां तथा विविधानां कर्मकाण्डानां विशेषरूपेण उल्लिखितमस्ति । यजमाना येन कर्मणा देवेभ्यो वर्षादिकं प्रार्थयन्ते, तद् कर्म खलु यज्ञ इति व्यपदिश्यते । लोके यज्ञसम्पादनेन वर्षा भवति । वर्षाया अन्नस्योत्पत्तिर्भवति, एवं तत्पश्चात् जगति विद्यमानं सकलजीवानां पोषणं भवति ।

अतः श्रीमद्भगवद्गीतायां तृतीयेऽध्याये श्रीकृष्णेन उक्तम्-

अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसम्भवः ।
यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः ॥[१] इति

यथा - विष्णुपुराणे -

यज्ञैराप्यायिता देवा वृष्ट्युत्सर्गेण वै प्रजाः ।
आप्यायन्ते धर्मज्ञ यज्ञाः कल्याणहेतवः ॥[२]

---

[१] श्रीमद्भगवद्गीता ३/१४

[२] विष्णुपुराणम् । १/६/८, गीताप्रेस गोरखपुर (उ०प्र०) संस्करणम्

CC-0. Nepal Sanskrit Academy. Kathmandu Collection

यज्ञेन सङ्क्रामकरोगाणां समूलोच्छेदं भवति इति वैज्ञानिकैः स्वीकृतं तथ्यम् । यज्ञेषु प्रयुक्तं घृततिलादिकं वस्तु यज्ञधूमरूपेण परिणतं भूत्वा वायुमण्डले प्रदूषणकाराणां जैविकतत्त्वानां विनाशं करोति । वेदेषु यज्ञस्य स्वरूपं सविशेष निरूपितमस्ति । उक्तं च यजुर्वेदे -

"समिधाऽग्निं दुवस्यत घृतैर्बोधयतातिथिम् । आस्मिन् हव्या जुहोतन॥"[१]

अग्निसत्कारः - यथा -

"अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम् । होतारं रत्नधातमम् ॥[२]

पर्यावरणे तरुमहत्त्वम्

वैदिकमहर्षिभिः वनस्पतिषु जन्तुषु च देवत्वं प्रकाशितम् । प्राचीनकाले भारतीया विविधान् जन्तून् पालितवन्तः । पालितानां तेषां जन्तूनां साहाय्येन स्वपरिश्रमेण च ते क्षेत्रेषु वनस्पतीनां समृद्धिं कृतवन्तः । तैः वनस्पतिषु देवत्वम् अनुभूतं फलतः वनस्पतिपूजनपरम्परा प्रवर्त्तिता इति मन्ये । भारतीयेषु धर्मग्रन्थेषु तरुगुल्मादीनामपि श्रद्धा-आस्थापरिपूर्णा पूजनविधिः प्राप्यते । वेदे सोमरस स्मृतिदायक-अमृतत्वसम्पादकश्च स्वीकृतः । गीतायां भगवान् श्रीकृष्ण अश्वत्थवृक्षविषये उक्तवान् यत् अश्वत्थवृक्षः भगवत्साररूपः । एवमेव भारतीयपरम्परायां वटवृक्षस्य, विल्ववृक्षस्य, आम्र - निम्ब - पिप्पल - शाल्लप्रभृतीनां वृक्षाणां छेदनं पर्यावरणसंरक्षणदृष्ट्या सर्वथा निषिद्धं विद्यते । पूर्वे तुलस्याम् अग्रभागे देवानां निवासो मनीषिभिः स्वीक्रियते ।

तत्र अथर्ववेदे वनस्पति-पशु-पक्षीसम्बन्धानां मन्त्राणां बाहुल्यं विद्यते । ऋग्वेदे औषधिसूक्तानामारोग्यकारकाणां पादपानां वर्णनं बहुत्र समुपलभ्यते ।

शतं वो अम्ब धामानि सहस्रमुत वो रुहः ।

---

[१] यजुर्वेदः ३/१
[२] ऋग्वेदः १/१

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अधा शतक्रत्वो यूयमिमं मे अगदं कृत॥
ओषधीः प्रति मोदध्वं पुष्पवतीः प्रसूवरीः ।
अश्वा इव सजित्वरीर्वीरुधः पारयिष्णवः ॥ (ऋग्वेदः १०.१७.२-३)

पर्यावरणे नदीनां महिमा

प्राचीनकालादेव नदीतडागादिरूपेण भूमण्डले विद्यमानजलराशिः भारतीयैः पूज्यो मन्यते । सन्दर्भेऽस्मिन् गङ्गानद्याः महिमा सविशेषं प्रशस्ता । गङ्गानदी भारतीयानां जीवने मातृवत् पूज्याभिमता । गङ्गालहर्यां पण्डितराजेन उक्तम् -

समृद्धं सौभाग्यं सकलवसुधायाः किमपि तन्
महैश्वर्यं लीलाजनितजगतः खण्डपरशोः ।
श्रुतीनां सर्वस्वं सुकृतमयमूर्तं सुमनसां
सुधासौन्दर्यं ते सलिलमशिवं नः शमयतु ॥

महर्षिणा वाल्मीकिनापि स्वरचिते रामायणे नदीनां-सागराणां च रमणीयं वर्णनं कृतम् । पञ्चमवेदरूपेण प्रसिद्धे महाभारतेऽपि गङ्गा, यमुना, गोदावरी, नर्मदादीनां पवित्राणां नदीनां सुन्दरं चित्रणं प्राप्यते । सरस्वतीनद्या जले स्नानेन पापक्षयो भवति। जलम् अमृतमेव वैदिकसाहित्ये जीवनजलयोः पर्यायत्वं स्वीक्रियते।

ज्योतिषशास्त्रे पर्यावरणमहत्त्वं प्राचीनत्वम् । भारतीयज्योतिषशास्त्रे सूर्यचन्द्रादीनां ग्रहाणां पूज्यत्वेन स्वीकारः प्राचीनानां भारतीयानां पर्यावरण-विषयकचिन्तनं प्रस्तुतम् । ग्रहाः पृथिव्यां विद्यमानवन्यप्राणिनां जीवनं साक्षात् प्रभावयन्ति । इमे ग्रहाः ज्योतिषगतिविधिविशिष्टं समग्रमपि पर्यावरणं सन्तुलयन्ति ।

मातृवत् पृथिव्याः श्रद्धाभावो वेदेषु बहुधा प्रकाशितः

'माता भूमिः पुत्रोऽहं पृथिव्याः०'[1] मन्त्रेषु मानवजातेःस्नेहमयसम्बन्धः प्रदर्शितः ।

[1] अथर्ववेदः १२/१/१२

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भारतीयसंस्कृतवाङ्मये पर्यावरणस्य विविधानां पक्षाणां विलक्षणसमन्वयः प्रतिपदं दृश्यते । मन्त्रेऽस्मिन् पर्यावरणसम्बद्धानां, तत्त्वानां समन्वयस्य प्रकारः विलोकनीय : ।

द्यौः शान्तिरन्तरिक्षं शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः।
वनस्पतयः शान्तिर्विश्वे देवाः शान्तिर्ब्रह्म शान्तिः सर्वं
शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि ॥[१]

अद्य प्राचीनानां परम्पराणां पुनर्जीवनस्य कालः सम्प्राप्त अस्ति ।

अस्मिन् शोधप्रपत्रे मया समुन्मीलनं क्रियते यत् समस्तेऽपि विश्वस्मिन् यदि प्रकृतिं प्रति देवत्वभावः प्रादुर्भविष्यति तर्हि समस्तेषु जीवेषु अनुरागः प्रतिष्ठापितो भविष्यति, तथा अस्माकं पर्यावरणं सर्वथा प्रदूषणमुक्तं प्रकृत्या सह मानवानां सम्बन्धो मैत्रीपूर्णः स्यात्, यस्मात् सम्न्विता धरणीविकासस्य सङ्कल्पना सार्थका भविष्यति ।

डॉ. अनिल प्रताप गिरिः
सहायकाचार्यः
संस्कृतविभागः,
पाण्डिच्चेरीविश्वविद्यालयः, पाण्डिच्चेरी

[१] यजुर्वेदः ३६/१७

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अङ्क-२३
जनवरी-जून २०१४

वेदविद्या
ISSN-2230-8962

वैदकवाङ्मये शब्दतत्त्वचिन्तनम्

दिनेशकुमारद्विवेदी

"एकः शब्दः सम्यग् ज्ञातः स्वर्गे लोके च कामधुग् भवति, मातापितरौ चास्य स्वर्गे लोके महीयेते" इति महाभाष्यवचनेनास्य विचारतत्त्वस्य प्रयोजनमुपपन्नम् । शब्दस्य तत्त्वं शब्दतत्त्वमिति पष्ठीतत्पुरुषे शब्दश्चासौ तत्त्वमिति कर्मधारये समासे च शब्दतत्त्वं स्पष्टम्। निरुक्तं तु-अर्थावबोधे निरपेक्षतया पदजातं यत्रोक्तं तन्निरुक्तमिति।[१] सम्प्रति यास्काचार्यस्य निरुक्तं विदितमेव भारतीयैः पाश्चात्त्यैश्च विद्वद्भिः। अत्र शब्दतत्त्वमिति विषयमवलम्ब्य विचारः प्रस्तूयते ।

व्याक्रियन्ते व्युत्पाद्यन्ते शब्दा[२] इत्यनेन व्याकरणे शब्दव्युत्पादनं जायते। शब्दतत्त्वं तु व्याकरणशास्त्रे परिशीलितम् । व्याकरणशास्त्रं तु व्याकृता वागिति तैत्तिरीयसंहितायां प्राप्यते।[३] अनेन व्याकरणेशब्दानुशासनं प्रधानभूतम् । अथ शब्दानुशासनमिति महाभाष्ये । तत्र व्याकरण-प्रयोजने रक्षोहागमलघ्वसन्देहाः प्रयोजनमिति यदुक्तम्, तत्तु वेदाश्रितमेव। निरुक्तं विद्यास्थानं[४] व्याकरणस्य कात्स्न्र्यम्।[५] तत्रार्थानुशासनं प्राधानभूतम्। निरुक्ते प्रतिपादिता अर्थाः शब्दाश्रिता

---

[१] ऋ. भा. भू. ५१ पृष्ठे
[२] महाभाष्ये १/१
[३] "वाग्वै पराच्य व्याकृता अवदत्, ते देवा इन्द्रमब्रुवन् ईमां नो वाचं व्याकुर्वीति.....तामिन्द्रो मध्यतोऽवक्रम्य व्याकरोत् । तस्मादियं व्याकृता वागुद्यते॥" तै. सं. ६/४/७/३
[४] अङ्गानि वेदाश्चत्वारो मीमांसान्यायविस्तरः।
धर्मशास्त्रं पुराणञ्च विद्या ह्येताश्चतुर्दश ॥ विष्णुपुराणे
[५] नि. १/५

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विशेषतो वेदाश्रिता इति निरुक्तस्य वेदाङ्गत्वं सर्वथा प्रसिद्धम्। महाकविकालिदासेनापि रघुवंशमहाकाव्यस्यादौ शब्दार्थसम्बन्धस्य नित्यत्वं प्रकटितम् -

वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥ (रघु. १/१)

महाभाष्ये पुनः - "सिद्धे शब्दार्थसम्बन्धे" [१] इति विवेचयता महर्षिणा पतञ्जलिनापि तयोर्नित्यत्वं प्रदर्शितम् । सकलवस्तुबोधनसमर्थः शब्द एवेति वाक्यपदीये। [२] आचार्यदण्डिमतानुसारेण शब्दप्रकाशेन प्रकाशितेयं पृथिवी। [३] वाक्यपदीये पुनः- **"इतिकर्त्तव्यता लोके सर्वा शब्दव्यपाश्रया"**[४] तथा **"अर्थक्रियासु वाक् सर्वान् समीहयति देहिनः"**[५] इति प्राप्यते । शतपथब्राह्मणे - **"वाचं धेनुमुपासीत"**,[६] बृहदारण्यके **"वाग्वै सम्राट् परमं ब्रह्म"**,[७] छान्दोग्योपनिषदि - **"वाग्वै तत् सर्वमिति"** प्राप्यते।[८] अनेन शब्दस्य महत्त्वं नितरां स्पष्टम्। निरुक्ते समुद्धृतोऽयमृग्वेदस्य मन्त्रो वाग्विवेचने तत्परः प्रतीयते -

चत्वारि वाक् परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः ।
गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति ॥[९]

---

[१] महाभाष्ये १/१

[२] न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ॥ वा.प. १/११७

[३] इदमन्धन्तमः कृत्स्नं जायेत भुवनत्रयम् ।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते ॥ (काव्यादर्शे)

[४] वा.पा. १/१२१

[५] तत्रैव १/१२७

[६] श.ब्रा. १/४

[७] वृहदारण्यके, ४/१

[८] यदु वै वाङ् नाभविष्यन्न धर्मो नाधर्मो व्यज्ञापयिष्यत् न सत्यं नानृतं न साधु नासाधु न हृदयज्ञो नाहृदयज्ञो वागेवैतत् सर्वं विज्ञापयति वाचमुपास्स्वेति ॥ छा.उ. ७/२/१

[९] ऋ.सं. १/१६४/४५

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

निरुक्ते दुर्गवृत्तौ मन्त्रस्यास्य व्याख्यायां विद्यते यत् तेषां पुनश्चतुर्णां पदानां त्रीणि गुहायां निहिता निहितानि नेङ्गयन्ति नार्थं प्रकाशयन्ति। तुरीयं चतुर्थभागम् एकं पदं मनुष्याः परिज्ञानाय वदन्ति । अस्मिन्नवसरे निरुक्ताचार्यो ब्राह्मणवचनं प्रस्तौति -

"अथापि ब्राह्मणं भवति - सा वै वाक् सृष्टा चतुर्धा व्यभवत्। एष्वेव लोकेषु त्रीणि पशुषु तुरीयम्। या पृथिव्यां साऽग्नौ सा रथन्तरे। याऽन्तरिक्षे सा वायौ सा वामदेव्ये। या दिवि सादित्ये सा बृहति सा स्तनयित्नौ। अथ पशुषु ततो या वागत्यरिच्यत तां ब्राह्मणेष्वदधुस्तस्माद् ब्राह्मणा उभयीं वाचं वदन्ति या च देवानां या च मनुष्याणामिति।[१] परा-पश्यन्ती-मध्यमा-वैखरीति चत्वारि वाक् पदानि विद्यन्ते । देहेऽपि मूलाधारेऽस्मिन् समुद्यति समीरणे तेनैव संस्कृते वायुना व्यापकत्वेनावस्थितः शब्दब्रह्मात्मको रवः परावागाख्यो मूलाधारेऽभिव्यक्तो भवति। नाभिपर्यन्तमागच्छता तेन वायुनाऽभिव्यक्तो रवः मनोविषयतामुपगतः पश्यन्तीपदेनाभिधीयते । हृदयपर्यन्तमागच्छता तेनाभिव्यक्तो रवो मध्यमावागिति । एवं मुखकण्ठादिस्थानेषु तेन वायुनाभिव्यज्यमानो वैखरीपदाख्यः।[२]

तथा चोक्तं मञ्जूषायां नागेशेन स्फोटप्रसङ्गे -

परा वाङ्मूलचक्रस्था पश्यन्ती नाभिसंस्थिता ।
हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा ॥
वैखर्या हि कृतो नादः परश्रवणगोचरः ।
मध्यमया कृतो नादः स्फोटव्यञ्जक उच्यते ।
चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य ।
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आ विवेश ॥

तत्र शब्दस्याभिव्यक्तिः कथं भवति ? इत्युच्यते -

आत्मा बुध्या समेत्यार्थान् मनो युङ्क्ते विवक्षया ।

---

[१] मै. सं. १/११/५, निरुक्ते १३ अध्या.
[२] अलङ्कारकौस्तुभे

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ॥
मारुतस्तूरसि चरन् मन्द्रं जनयति स्वरम् ॥

प्राणमनोबुद्धिप्रसूतमान्तरं ज्ञानं सूक्ष्मवाग्रूपेण स्थितं सत् स्वरूपस्याभिव्यक्तये शब्दरूपतां याति । यथोक्तं वाक्यपदीये -

अथेदमान्तरं ज्ञानं सूक्ष्मवागात्मना स्थितम् ।
व्यक्तये स्वस्य रूपस्य शब्दत्वेन विवर्तते ॥

शब्दश्चार्थरूपेण विवर्तते -

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥

अर्थोऽपि स्थूलविश्वरूपेण विवर्तमानो भवति -

शब्दस्य परिणामोऽयमित्याम्नायविदो विदुः ।
छन्दोभ्य एव प्रथमं विश्वमेतद् व्यवर्तत ॥

अर्थात् सृष्टेर्विकासो वाग्ब्रह्मरूपबीजादेवाभवत् । अत्र श्रुतिरपि प्रमाणम् - "एकोऽहं बहु स्याम्" इति ।

ऋग्वेदे बहूनि सूक्तानि, अनेके मन्त्राश्च वाक्तत्त्वविषयकाः सन्ति । संहितासु, ब्राह्मणग्रन्थेषु, आरण्यकेषु, उपनिषत्सु च प्रतिशाखं वाक्तत्त्वरूपस्य शब्दब्रह्मणः चर्चा सङ्केतो वा वर्तत एव, षट्सु वेदाङ्गेषु, शिक्षा-निरुक्त-व्याकरणच्छन्दस्सु चतुर्षु वेदाङ्गेषु शब्दब्रह्मण एव विवेचनं विविधं कृतं वर्तते । ऋग्वेदकालादारभ्य अद्य यावद् भारतीयैर्मनीषिभिर्वाग्ब्रह्मणो मननं क्रियमाणमस्ति । दर्शनग्रन्थेष्वपि शब्दखण्डं विशेषं महत्त्वं भजते । अन्येषु परवर्तिषु ग्रन्थेषु यथास्थानं शब्दानां विशिष्टा निरुक्तयो निर्दिष्टाः सन्ति ।

यत्र तत्र वाक्तत्त्वज्ञानस्यावश्यकत्वविषयेऽप्युल्लेखो वरीवर्ति । ताण्ड्यमहाब्राह्मणस्य प्रथमाध्याये त्रयोदशे खण्डे आख्यायिकैका वर्तते, यदनुसारेण असुरैः सह सङ्ग्रामे देवानां विजयो वाचो नैपुण्येनाभवत् । एतद्विषये महाभाष्योद्धरणद्वयं निदर्शनकोटिमाटीकते- "तेऽसुरा हेलयो हेलय इति कुर्वन्तः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पराबभूवुः" इति । "दुष्टः शब्दः स्वरतो वर्णतो वा, मिथ्याप्रयुक्तो न तमर्थमाह । स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् । इति च । इन्द्रशत्रुर्वृत्र उच्चारणे स्वरवैगुण्यमात्राद् विनाशमगात् । अतो भारतीयसंस्कृतौ वाचः शुद्धिविषये महान् संरम्भः कृतो विद्यते । न केवलं कर्मगतं वैगुण्यं चिन्तनगतं वैगुण्यं वा हानिकरम्, अपि तु वाग्गतं वैगुण्यमपि हानये एव कल्पते । अत एव षडङ्गसहितानां वेदानां तत्रापि व्याकरणस्याध्ययनं वाग्वैभवसम्भृतानां ब्राह्मणानां कृते धर्मत्वेनाभ्युपगतमस्ति -

"ब्राह्मणेन निष्कारणं धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च । प्रधानं च षट्सु अङ्गेषु व्याकरणम् ।" इति ।

रामायणकालेऽपि वाक्तत्त्वज्ञानविषये महान् आग्रह आसीत् । भगवान् रामो हनुमता सह साक्षात्कारे तद् व्याहृतां वाचं श्रुत्वा तं प्रशंसितवान् -

नूनं व्याकरणं कृत्स्नमनेन बहुधा श्रुतम् ।
बहुव्याहरतानेन न किञ्चिदपभाषितम् ॥

छान्दोग्योपनिषच्छ्रुतिरपि वाचो महत्त्वविषये व्याहरति - **'यद् वै वाङ् नाभविष्यत्, न धर्मो नाधर्मो व्यज्ञापयिष्यत् न सत्यं नानृतं, न साधु नासाधु । वागेवैतत् सर्वं विज्ञापयति वाचमुपास्स्व।"**

इति ऋङ्मन्त्रे मनुष्यव्यवहृताया वैखरीवाचो विभिन्ना विषया सङ्केतिताः सन्ति । चत्वारि शृङ्गाणि- नामाख्यातोपसर्गनिपातरूपः पदविभागः, त्रयः पादाः- भूतभविष्यद्वर्तमानरूपः कालभेदः, द्वे शीर्षे-नित्यकार्यरूपः शब्दस्वरूपभेदः, सप्त हस्तासः- सप्त विभक्तयः । त्रिधा बद्धः- उरसि, कण्ठे, मूर्ध्नि । एतैः सर्वैः पदविज्ञानविषयाः सिध्यन्ति ।

अर्थानुरोधेन काश्चिद् निरुक्तयः असङ्गता इव प्रतिभान्ति । यथा - हृ = अभिहरन्ति अस्मै, द=ददत्यस्मै, यम् = एति स्वर्गलोकमर्थाद् हृदयम् (शतपथब्राह्मणे)। ऐतरेयब्राह्मणे ऐतरेयारण्यके च 'विश्वामित्र' शब्दे षष्ठीतत्पुरुष-समासः स्वीकृतोऽस्ति; किन्तु अस्मिन्नेवारण्यकेऽन्यत्र बहुव्रीहिः स्वीकृतोऽस्ति - विश्वं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मित्रं यस्य, तस्माद् विश्वामित्रः । तत्पुरुषस्वीकारे नपुंसकलिङ्गत्वादनुपपन्नेयं व्युत्पत्तिः ।

ऐतरेयारण्यके वर्णविचारो लभ्यते । यथा - 'यानि व्यञ्जनानि तच्छरीरं, यो घोषः स आत्मा, य ऊष्माणः स प्राणः।' अत्र व्यञ्जनशब्देन स्पर्शवर्णा गृहीताः सन्ति । घोषशब्देन च स्वराः अर्द्धस्वराः अन्तःस्थवर्णाश्च । इदमन्यत्र स्पष्टमस्ति - पृथिव्या रूपं स्पर्शाः, अन्तरिक्षस्योष्माणः, सामवेदस्य स्वराः । चक्षुषो रूपं स्पर्शाः, श्रोत्रस्योष्माणः, मनसः स्वराः । प्राणस्य रूपं स्पर्शाः, अपानस्योष्माणः, व्यानस्य स्वराः । अत्र अन्तःस्थाः स्वरेष्वन्तर्भूताः अर्द्धस्वरत्वात् ।

छान्दोग्योपनिषद् व्याहरति- **'सर्वे स्वरा घोषवन्तो बलवन्तश्च वक्तव्याः** । ऐतरेयारण्यकस्य प्रथमाध्याये पञ्चमखण्डे सन्धिविषयकं विवेचनमस्ति । यथा - 'पूर्वम् अक्षरं पूर्वरूपम्, उत्तरम् उत्तररूपम्, योऽवकाशः पूर्वरूपोत्तररूपे अन्तरेण सा संहिता।' अत्र माण्डूकेयेण ऋषिणा किमपि संशोधनं कृतम् । तत्र तत्पुत्रेणापि किञ्चित् संशोधनं कृतम् । संहिताविश्लेषणे माण्डूकेयाणां महत्त्वपूर्णं योगदानमस्ति । माण्डूकेयपुत्रेणैव अन्तःस्थाः पृथक्कृत्य वर्णानां विभाजनं चतसृषु श्रेणीषु कृतम् । संहिताया आध्यात्मिकं विश्लेषणमपि कृतमस्ति । तथा हि- पृथिवी पूर्वरूपं द्यौरुत्तररूपं वायुः संहितेति माण्डूकेयः । वाक् पूर्वरूपं, मनः उत्तररूपं, प्राणः संहितेति ।

यद्यपि उपनिषत्सु ब्रह्मत्वमेव मुख्यतया प्रतिपादितम्; तथापि वाक्तत्त्वविषयका विचारा उपनिषत्स्वपि विकीर्णरूपेण यत्र तत्र लभ्यन्ते । तैत्तिरीयोपनिषदः 'शिक्षावल्ली' संहिती उपनिषदिति नाम्ना प्रसिद्धा ।

अनेन विवरणेन स्पष्टमिदं यत् संहिता-ब्राह्मणारण्यकोपनिषत्सु षडङ्गेषु अनुक्रमणी- बृहद्देवता-प्रातिशाख्यादिषु वैदिकवाङ्मयेषु वाक्तत्त्वविषया विचारा भूयो विमृष्टाः सन्तीति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शब्दतत्त्वाश्रितं पदविभाजनं सर्वत्र महत्त्वपूर्णमिति यास्कसम्मतं पदविभाजनं द्रष्टव्यम् । पदविभागे यथार्थं पदमैन्द्राणामिति[१] ऐन्द्रसम्प्रदाय एकमेव पदं स्वीक्रियते। पाणिनिस्तु सुबन्ततिङन्तरूपेण पदस्य विधिद्वयं स्वीकरोति ।[२] केचिदाचार्याः पदस्य विभागत्रयं स्वीकुर्वन्ति । अनेनोपसर्गनिपातावेकतः कृत्वा सुबन्ततिङन्तावुसर्ग-निपाताश्च तयोर्विभागा भवन्ति। [३] केचनाचार्याः पदस्य पञ्चभेदान् स्वीकुर्वन्ति नामाख्यातोपसर्गनिपाताः कर्मप्रवचनीयाश्चेति।[४] ऋक्प्रातिशाख्ये,[५] यजुःप्रातिशाख्ये,[६] अथर्वप्रातिशाख्ये,[७] कौटिल्यस्यार्थशास्त्रे,[८] व्याकरणमहाभाष्ये[९] च पदस्य चतुर्धा विभागः स्वीकृतः ।

नामपदं तु - 'सत्त्वप्रधानानि नामानीति निरुक्ते । नामपदस्य व्याख्यायां दुर्गवृत्तौ- 'नमन्ति आख्यातशब्दे गुणभावेन, नमन्ति वा स्वमर्थमाख्यातशब्दवाच्ये गुणभावेनेति नामानि ।' नाम्नि सत्त्वस्य प्राधान्यं विद्यते । ऋक्प्रातिशाख्ये,[१०] यजुः प्रातिशाख्ये [११] , अथर्वप्रातिशाख्ये, [१२] कौटिल्यस्यार्थशास्त्रे [१३] च सत्त्वप्रधानानि नामानीत्येव स्वीकृतम् । बृहद्देवतायां तु -

शब्देनोच्चरितेनेह येन द्रव्यं प्रतीयते ।

---

[१] निरुक्ते दुर्गवृत्तिः १/१
[२] सुप्तिङन्तं पदम् - अष्टा. १/४/१४
[३] त्रीणि निपातोपसर्गावेकतः कृत्वा (निरु. दु. वृ. १/१)
[४] द्विधा कैश्चित् पदं भिन्नं चतुर्धा पञ्चधाऽपि वा । वा.प. जाति. १
[५] निरु. १/१
[६] नामाख्यातम् उपसर्गनिपाताश्चत्वार्याहुः पदजातानि शाब्दाः । ऋ.प्रा. १२/५/६९
[७] तच्चतुर्धा नामाख्यातोपसर्गनिपाताः । वाज. प्रा.शा. ८/५२
[८] चत्वारि शृङ्गाणि चत्वारि पदजातानि । ऋ.प्रा. १२/७
[९] तन्नाम येनाभ
[१०] सत्त्वाभिधायकं नाम । यजु. प्रा. ५/५४-५५
[११] नाम सत्त्वाख्यमुच्यते । अथर्वप्रा. २/१
[१२] तत्र नामसत्त्वाभिधायीति । कौ. अ. शा. १०/२८, पृ. ७२
[१३] अष्टौ यत्र प्रयुज्यन्ते नानार्थेषु विभक्तयः ।
तन्नाम कवयः प्राहुर्भेदे वचनलिङ्गयोः ॥ बृ.दे. १/४३

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तदक्षरविधौ युक्तं नामेत्याहुर्मनीषिणः ॥ (बृ.दे. १/४२)

पुनश्च तत्रैव प्राप्यते यद् यत्र सर्वा विभक्तयो वचनलिङ्गयोर्भेदेनार्थेषु प्रयुक्ता भवन्ति, तन्न ।[१] नामान्याख्यातजानीति शाकटायनो नैरुक्तसमयश्चेति नाम्नः[२] आख्यातजत्वं प्रसिद्धम् । शाकटायनप्रभृतयो वैयाकरणा यास्कप्रभृतयो निरुक्तकाराश्चाख्यातजसिद्धान्तं स्वीकुर्वन्ति । आधुनिकभाषाविज्ञानेऽपि सिद्धान्तोऽयं स्वीकृतः ।

भावप्रधानमाख्यातमित्याख्याते भावस्य प्राधान्यं निरुक्ते विवेचितम् । दुर्गवृत्तौ तु- "आख्यायते गुणभावेन वर्तमाना अनेककारकप्रविभक्ता स्फुरमाणेव प्रधान-द्रव्यभावाभिव्यक्त्युन्मुखीभूता क्रिया । तस्याश्च प्राधान्येन प्रवर्तमानो भावः स्वात्मलाभप्रधान इत्याख्यातः ।[३] अत आख्याते प्रधानभावेन क्रिया गौणत्वेन द्रव्यञ्च द्रव्यञ्च यत्र तदाख्यातमिति स्पष्टमेव । ऋग्वेदप्रातिशाख्ये,[४] यजुःप्रातिशाख्ये,[५] अथर्वप्रातिशाख्ये[६] च क्रियाया वाचकत्वमेवाख्यातम् । कौटिल्यस्यार्थशास्त्रे,[७] महाभाष्ये[८] च क्रियायाः प्राधान्यमेवाख्यातमित्युक्तम् । बृहद्देवतायामपि भावप्रधानमाख्यातमिति प्राप्यते।[९] निरुक्ते आख्यातस्य सूक्ष्मविश्लेषणमुपन्यस्तम् - "पूर्वापरीभूतं भावमाख्यातेनाचष्टे व्रजति पचति इत्युपक्रमप्रभृत्यपवर्गपर्यन्तम् ।[१०] तत्र

---

[१] निरु. १/१
[२] निरु. दु.वृ. १/१/
[३] निरु. दु. वृ. १/१
[४] क्रियावाचकमाख्यातम् । ऋ.प्रा. १२/८/७०७
[५] यजुःप्रा., ८५४-५५
[६] आख्यातं यत् क्रियावाचि । अथर्वप्रा. १०/२८
[७] अविशिष्टलिङ्गमाख्यातं क्रियावाचि । कौ. अ. शा. पृ. ६२
[८] क्रियाप्रधानमाख्यातं भवति । महाभाष्ये ३/२
[९] बृ.दे. २/१२१
[१०] निरु. १/१/१

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भावविकारेषु-षड्भावविकारा भवन्तीति वार्ष्यायणिः इत्युपस्थापयता महर्षिणा यास्केन भावविकाराणां विश्लेषणं कृतम्।

प्रादयः[१] **उपसर्गाः क्रियायोगे**[२] इत्यष्टाध्यायीसूत्राभ्यामुपसर्गाः स्पष्टाः। दुर्गवृत्तौआख्यातमुपगृह्यार्थविशेषमिमे तस्यैव सृजन्तीत्युपसर्गाः।[३] शाकटायनस्तु 'न 'न निर्बद्धा उपसर्गा अर्थान्निराहुरिति मन्यते।'[४] फलतः पाणिनेः 'उपसर्गाः क्रियायोगे' इति कथनं शाकटायनसिद्धान्तानुकूलम्। परमत्र यास्केनाचार्यगार्ग्यस्याभिम-तमुपस्थापयता प्रकाशितं यत्- निर्बद्धा अपि उपसर्गाः अर्थान् प्रकाशयन्ति, यतो हि 'उच्चावचाः पदार्था भवन्तीति गार्ग्यः।' वेदेषु निर्बद्धा अप्युपसर्गा अर्थवन्तः प्रयुक्ताः सन्ति। पुनश्च निरुक्तेऽपि- "आ इत्यर्वागर्थे प्परेत्येतस्य प्रतिलोम्यमभीत्याभिमुख्य-मित्यादय उपसर्गाणामर्थाः प्रदर्शिताः।

निपातास्तु उच्चावचेष्वर्थेषु निपतन्ति नानाप्रकारकेष्वर्थेषु प्रयुक्ता भवन्तीति कस्मिंश्चिदेवार्थे यः प्रसिद्धो गुणस्तदन्यस्मिन्न प्रसिद्धस्तद्गुणेऽर्थे शब्दमात्रेण यदुपसंयोज्य तद्गुणप्रकाशनं क्रियते सोपमा। अनेनोपमार्थे कर्मोपसङ्ग्रहार्थे पदपूरणार्थे च निपाताः प्रयुक्ता भवन्ति। निपातानां त्रिष्वर्थप्रधानेषु निपातेष्वन्येऽपि विभागा अन्तर्लीना भवन्ति। निषेधार्थे, हेत्वर्थे, निन्दार्थे, पूजार्थे, विचारणार्थे, विनिग्रहार्थे, अनुपृष्टे, हेत्वपदेशे, विद्याप्रकर्षे चापि प्रयुक्ता निपाता यास्केन विवेचिताः सन्ति।

उपसर्गाणां निपातानां च वाचकत्वं द्योकत्वं वेति जिज्ञासायां निरुक्ते विवेचनं प्राप्यते। उपसर्गाणां निपातानां येऽर्था निरुक्ते प्रतिपादिता वैदिकोदाहरणेषु च दर्शितास्ते वाचकत्वमनुसरन्ति। अन्ये च द्योतकत्वमपि दधति वैदिकमन्त्राणामर्थ-प्रकाशनाय प्रथमं यास्काचार्येणैव निर्वचनं कृतमिति शब्दानां निर्वचने ध्वन्यात्मकस्यार्थात्मकस्य, दृश्यात्मकस्य, शब्दानुकृतेर्भौगोलिकस्यैतिहासिकस्य

---

[१] पा. अष्टा. १/४/५४
[२] तत्रैव १/४/५९
[३] निरु. दु. वृ. १/१
[४] तत्रैव १/९

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पौराणिकस्याधारस्य च कल्पनं सर्वथा भाषावैज्ञानिकतामेव दधाति । निर्वचनक्रमे प्रत्यक्षवृत्त्या परोक्षवृत्त्यातिपरोक्षवृत्त्या च तेषां प्रदर्शनं सत्यमेव तेषां शब्दानामर्थप्रकाशनाय सर्वथा महत्त्वसम्पन्नम् ।

निष्कर्षतः कथनमिदं सर्वथा सङ्गतं प्रतीयते यन्निरुक्ते शब्दतत्त्वस्य निरूपणं महनीयमस्ति । शब्दस्य नित्यत्वं व्यापकत्वं च दार्शनिकविचारपथमायाति । वैयाकरणा अपि शब्दस्य नित्यत्वं स्वीकुर्वन्तीति पूर्वमेव दर्शितम् । शब्दानां व्यापकत्वनिरूपणे श्रीमदौदुम्बरायणस्य मतं पूर्वपक्षे स्थापयता यास्काचार्येणोत्तरपक्षे निरस्तम्। तथा च तेषां व्यापकत्वमुपस्थापयता तेन स्वीया भाषावैज्ञानिकी दृष्टिः प्रदर्शिता । **'अणीयस्त्वाच्च शब्देन सञ्ज्ञाकरणं व्यवहारार्थं लोके'** इति प्रतिपादयता तेन शब्दस्य व्यावहारिकोपयोगो दर्शितः. । शब्दविभागेऽपि दृष्टिरस्य विशिष्टा वर्तते । यतो हि पाणिनिप्रभृतिभिः शाब्दिकैः सुबन्तं तिङन्तं च पदसञ्ज्ञं स्यादिति पदस्य विभागद्वयं संस्तुतम् । कैश्चिच्छब्दकारैस्तु यास्कस्य पदविभाग एव स्वीकृतः । महाभाष्यकारः पतञ्जलिः स्वयं विषयेऽस्मिन् यास्कं प्रति सम्मानं दर्शयति। यास्केन स्वरसंस्कारयुक्ताः शब्दा दृष्टव्ययेन नामाख्यातसञ्ज्ञकाः प्रतिपादिताः, पुनश्चादृष्टव्ययशब्दा अव्ययरूपा उपसर्गनिपातभूताः स्वीकृताः । पाणिनिरपि व्युत्पन्नाव्युत्पन्नान् शब्दान् स्वीकरोति । विषयेऽस्मिन् पाणिनेर्दृष्टिस्तु सूक्ष्मा; परं पदविभागेषु यास्कस्य दृष्टिरपि महत्त्वपूर्णाऽस्तीति नाम्न आख्यातजत्वं भावविकारेषु षड्विधत्वमुपसर्गनिपातानामर्थवत्वं पदविरहिते स्वतन्त्रेऽपि तेषामर्थप्रकाशकत्वञ्चेत्यादीनि शब्दतत्त्वानि पृथक् पृथगनुसन्धेयानीति दिक् ।

दिनेशकुमारद्विवेदी
शोधच्छात्रः
संस्कृत-विद्या-धर्मविज्ञानसङ्कायः
काशी हिन्दू विश्वविद्यालयः, वाराणसी

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अङ्क-२३
जनवरी-जून २०१४

वेदविद्या
ISSN-2230-8962

वेदेषु व्रतविमर्शः

लक्ष्मण पन्थी

अनन्तानन्तचराचरव्याप्ताखिलब्रह्माण्डनायकसृष्टिस्थितिसंहारव्यापारव्यापृक्तना-दर्शनदृष्ट्या नानास्वरूपपरिकल्पितास्य परंब्रह्मणः पञ्चभौतिकाख्यसृष्टेः सञ्चालनाय स्वयं नानापथानां, व्यवस्थानां, कर्मणां, स्वरूपाणां ,चलाचलानां, स्थावरजङ्गमानां, आकाशपातालभूर्भुवादिचतुर्दशलोकानां स्थूलानां सूक्ष्माणां विचाराणां च समञ्जनं ततान । यद्यपि इमे सर्वे अपि क्रमाः दृष्ट्या विश्यङ्खलितं विशीर्णं च प्रतिभान्ति तथापि स्वस्मिन् सर्वे लब्धक्रमाः राजन्ते । एषा महिमा बहुलभूतस्यानन्तशक्तिसम्पन्नस्यैव । जगति यानि यानि वस्तूनि लोकलोचनीभूतानि सन्ति, तानि सर्वाणि अपि कमपि निश्चितं व्रतं निर्वहन्ति । व्रतं विना जीवनं निरर्थकमेव । स च व्रतः कः ? इति नानाविदुषां मते मयाऽत्र विवेच्यते । व्रतशब्दस्य गणना संस्कृतशास्त्रेषु विद्यमानानां शब्दानां मध्ये बहुप्राचीनकालादेव व्यवहृता भवति । व्रतशब्दस्य व्युत्पत्तिविषये अर्थविषये च विदुषां महान् मतभेदो दरीदृश्यते । तेषां सङ्क्षेपेणात्र शोधपत्रे समुपस्थाप्यते । सेण्ट पीटर्सवर्गकोशे व्रतशब्दस्य उत्पत्तिः वृञ् वरणे इत्यस्माद्धातोः वरणार्थे अर्थात् चयनार्थे स्वीकृतो विद्यते । तथा च तस्मिन् कोशे तस्य शब्दस्य नानार्थाः एवंविधाः उपलब्ध्यन्ते । यथा – १- सङ्कल्पः, आदेशः, विधिः निर्दिष्टा व्यवस्था । २- वशता, आज्ञापरकता, सेवा, ३- स्वामित्वम् अथवा रिक्थम् । ४- व्यवस्था, निर्धारित उत्तराधिकारः, क्षेत्रम् । ५- वृत्तिः, व्यापारः, आचारिकं कर्म, प्रवृत्तिसंलग्नता, आचारोऽथवा रीतिरिति । ६- धार्मिकं कार्यम् ,उपासना, कर्तव्यता, ७-कस्यापि अनुष्ठानस्य धार्मिकतया तपस्यासम्बन्धीकर्म, अथवा आचरणसेवनम् , सङ्कल्पः पुनीतः कर्म वा । ८- सामान्यरूपेण सङ्कल्पः, निश्चयार्थे वा । ९- अन्यो

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विशिष्टार्थोऽपि । मैक्समूलरमतेऽपि वृ धातोः व्रतशब्दस्य सिद्धिर्जायते । तस्यार्थः रक्षणम् , तेन तत्र प्रोक्तं यत् अस्य शब्दस्यार्थः भावे आसीत् परन्तु वयं आवेष्टितार्थे, रक्षणार्थे, तथा चाग्रे अस्यार्थस्य विचारप्रसङ्गे निर्णीतः, निश्चितः, विधिः, परन्तु कालान्तरे तस्यार्थस्य विकासो जातः, तस्मिन् विकासक्रमे तस्यार्थः आधिपत्यार्थे सत्तार्थे च व्यवहृतो जातः । ह्विटनी महोदयः तस्य मैक्समूलरमतस्य समर्थनं न चकार । तथा च सेन्टपीटर्स महोदयानां कोषात् बहिर्निष्काष्य घोषणां कृतवान् यत् वृ वरणार्थकधातोः व्युत्पत्तिर्न समीचीना । एवमपि तैः प्रतिपादितं यत् वृ इत्यस्य धातोः सङ्कल्पः अनुशासनं नायाति । वृ इत्यस्य वरणं तथा च सम्मानस्वरूपमागच्छति । वृ इति धातोः त प्रत्ययस्य आगमनस्य वा प्रयोगः अल्पशः एव उपलभ्यते । व्रतशब्दस्य यदि कोऽपि तुल्यार्थकः शब्दः समुपलभ्यते स च मर्तः इति । यस्य विधानं मृ धातोः भवति तेषां मते व्रतशब्दः वृतु वर्तने इत्यस्यमाद्धातोः प्रवर्तने , प्रारम्भे अर्थे च व्युत्पादितो विद्यते । तेषां मते वृ धातोः अ प्रत्यये कृते सति व्रतशब्दस्य व्युत्पत्तिं सम्पादयितुं शक्यते । तेषां मते व्रजशब्दः व्रतशब्दतो व्युत्पादितो इति नियन्त्रयितुं शक्यते । तथा च तस्य मते ऋग्वेदे व्रतशब्दः बहुधा गतिसम्बन्धी क्रियापदे प्रयुक्तो विद्यते । यथा- चरः, सश्च, अथवा स च इत्यादिभिः सह बहुधा प्रयुक्तो दृश्यते । वी.एम.आप्टे महोदयः अपि ह्विटनीमहोदयस्य वार्तां स्वीकृतवान् । तथा चोक्तं वृत् धातोरेव व्रतशब्दस्य सिद्धिर्जायते । तथा च सहर्षम् इदमपि प्रतिपादितवान् यत् वृ इत्यस्यार्थः वरणं, चयनं, रक्षणम् , आवेष्टितकरणं वा न सम्भवति । सः प्रोक्तवान् यत् ऋग्वेदे प्रयुक्ताः ये व्रतशब्दाः विद्यन्ते तेभ्यः सङ्कल्पेच्छादेशाज्ञाकारितानिर्दिष्टहेतवः इत्यादयः अर्थाः निर्दिष्टाः सन्ति । वृत् धातोरर्थः न हि केवलं प्रगतिः प्रवृत्तिः आरम्भमात्रं वा अपितु अभिमुखीभवनं, भ्रमणं, स्वाभिमुखीभवनमपि अस्ति । अतः व्रतशब्दार्थः केवलो विधिः, कर्म वा आचारविधिं दर्शयति । सहैव चक्राकारिकागतिः, परिभ्रमणं तथा च वृत्ताकारमार्गस्यापि अर्थं प्रत्यायति । उपर्युक्तमतद्वयमपि वैदिकदृष्ट्या नोचितम् । यतो हि वृत्धातोः व्रतशब्दस्य व्युत्पत्तिरमान्या । व्रतपदेषु यत्र अभि ,आ, नि, परि, प्र, अथवा वि नामकस्योपसर्गस्य यदा प्रयोगः प्रतिभाति तदा

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मूलार्थस्य प्रतीतिर्न जायते। यतो हि उपसर्गप्रयोगेण धातोरर्थपरिवर्तनं स्वत एव भवति। उक्तं च-

उपसर्गेण धात्वर्थो बलादन्यत्र नीयते ।
प्रहाराहारसंहारविहारपरिहारवत् ।। (सिद्धान्तकौमुदी तृतीयभागः)

वृत् शब्दस्य साक्षात् अर्थः भवति भवनम् ,तिष्ठनम् , पालनम् इत्यादिः । ऋग्वेदे व्रतधातोः प्रयोगः उपसर्गं विना न दृश्यते । प्रायः अग्रे पृष्ठे वा उपसर्गस्य प्रयोगः परिपालितोऽस्ति । आप्टेमहाशयान्यथादृष्टिं कृत्वा आह, बहुधा विद्वांसः व्रतशब्दस्यार्थः विधिविधानादेशयज्ञसङ्कल्पनिर्दिष्टहेतुकर्तव्यादि अर्थेषु प्रयोगं कुर्वन्ति। सीमिततया च व्यवहरन्ति । तेषां मते ऋग्वेदे प्रयुक्तस्य व्रतशब्दस्यार्थः वृत्ताकारमार्गः इति पक्षं न लक्ष्यगोचरी कृतो विद्यते । अपितु तेषां मते ऋग्वेदे प्रयुक्तस्यास्य व्रतशब्दस्यार्थः स्वर्गिको पथः, दिव्यपरिक्रमा, काले काले देवानां स्वतश्चतुर्दिग्भ्रमणम्, तेषां मते कमपि देवमधिकृत्य धार्मिकविधीनामर्थविशेषो वा व्रतो विद्यते । बालगङ्गाधरतिलकमहोदयः स्वकीये "ओरायन" ग्रन्थे लिखितवान् यत् ऋग्वेदे प्रयुक्तव्रतशब्दस्यार्थः सत्यपथः, राशिचक्रस्य विस्तृतामेखला, यस्यातिक्रमणं ज्योतिष्मान्तारागणाः कदापि न कुर्वन्ति । आप्टेमहोदयस्य मतमिदं यत् ऋग्वेदे प्रयुक्तस्य ऋत् शब्दस्य अर्थो भवति राशिचक्रस्य मेखला । परन्तु मतमिदं बहूनां विदुषां मते न समीचीनं प्रतिभाति । ऋग्वेदे प्रयुक्तस्य ऋत् शब्दस्यार्थं त्रिषु अर्थेषु प्रयुक्तो परिलक्ष्यते । १- प्रकृतिर्गतिः,२-अखिलब्रह्माण्डस्य नियन्त्रिता व्यवस्था, ३-सः पथः येन आदित्यमण्डलस्य दलसमुदायः ऋतं प्रति गच्छति ।

यं बाहुतेव पिप्रति पान्ति मर्त्यं रिषः । अरिष्टः सर्वेएधते ।।[१]
द्वादशारं नहि तज्जराय वर्वर्ति चक्रं परि द्यामृतस्य ।
आ पुत्रा अग्ने मिथुनासो अत्र सप्त शतानि विंशतिश्च तस्थुः ।।[२]

[१] ऋग्वेदः १.४१.२
[२] ऋग्वेद १.१६४.११

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथवा ऋतार्थः यत्र द्वादशसङ्ख्काः शलाकाः (अर्थात् द्वादशसङ्ख्काः राशयः विद्यन्ते । परिश्रान्तिरहितो भूत्वा आकाशे परिक्रमां सम्पादयन्ति । परन्तु ऋतशब्दस्य इमे अर्थाः व्रतशब्दार्थे प्रकाशं न विकसयन्ति । ऋतव्रतयोः कापि तुलना नास्ति । आप्टेमहोदयस्य मतं न समीचीनं प्रतिभाति । ऋतशब्दः भारोपीयः परन्तु व्रतशब्दः हिन्देरानी अपि अस्ति । भारोपीयस्तु नास्त्येव। आप्टेमहाशयो लिखति व्रतशब्दार्थयोः विकासस्य द्विधारूपमुपलभ्यते । उभावपि समानौ एव । यथा दिव्यस्वरूपं मानवीयस्वरूपञ्च । परन्तु ऋतशब्दस्यार्थे एवं वैभिन्न्यं न प्रतिभाति । एतेषां मते व्रतशब्दस्य दिव्यस्वरूपे षट् रूपाणि, तथा च मानवीयस्वरूपे चत्वारः अर्थाः उपलभ्यन्ते । आहत्य दिव्यमानवीयस्वरूपमधिकृत्य दश अर्थाः राजन्ते । तेषां मते व्रतार्थम् आङ्ग्लभाषायां षष्ठिअर्थाः निर्दिष्टाः सन्ति । परन्तु ऋग्वेदे २२० पर्यायव्रतशब्दाः समागताः सन्ति । इदानीं ऋग्वेदमधिकृत्य व्रतस्वरूपं विवेच्यते। व्रतशब्दः वृ वरणे इत्यस्माद्धातोः सिध्यति । अस्माद्धातोः कन्याद्वारावरवरणस्याथवा अभिभावकविधया वरचयनस्य या परिक्रिया इति शब्दार्थः आगच्छति ।

आ जामिरत्के अव्यत भुजे न पुत्र ओण्योः ।
सरज्जारो न योषणां वरो न योनिमासदम् ॥[१]

एवम्- स्तोमा आसन् प्रतिधयः कुरीरं छन्द ओपशः ।
सूर्याया अश्विना वरा ऽग्निरासीत् पुरोगवः ॥[२]
सोमो वधूयुरभव दस्विनास्तामुभा वरा ।
सूर्यां यत् पत्ये शंसन्ती मनसा सवितार्ददात् ॥[३]

वरणं तु वरणकर्तुः इच्छायाः सङ्कल्पस्य वा परिणामो भवति । अनेन आगच्छति यत् वृधातोः इच्छाऽपि तात्पर्यं प्राप्नोति । एवं सिध्यति यत् व्रतशब्दः वृधातोः तप्रत्यये

[१] ऋग्वेदः९.१०१.१४
[२] ऋग्वेदः१०.८५. ८
[३] ऋग्वेदः१०.८५.९

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कृते सति स्वरूपमधिगच्छति । व्रतार्थः सङ्कल्पः । अत्र विशेषः यो मनुष्यः शक्तिसम्पन्नो भवति, अधिकारी वा भवति तस्येच्छा अन्येभ्यो विधिरादेशो वा भवति। परन्तु भक्ताः स्वयमेव दैवनिर्धारितस्य आदेशस्य स्वतः परिकल्पनां कृत्वा परिपालयन्ति । तस्य तात्पर्यं भवति आज्ञापालनकार्यस्य कर्तव्यम् । यदा आदेशाः पालिताः भवन्ति तथा च बहुदिनं यावत् पारिपालिताः भवन्ति तदा तानि कर्तव्यानि अनुग्रहबन्धयुक्तानि परिचितानि भवन्ति तदा तानि परम्परागतानि आचारव्यवहारस्वरूपं प्राप्नुवन्ति । यदा जनाः देवसम्पादितकर्मणां नियमानां वा स्वजीवने निर्धारितकर्म स्वीकृत्य आचरन्ति तदा धार्मिकोपासना इति कर्तव्यस्य सृष्टिर्जायते । यदा कोऽपि देवानां विशिष्टानुग्रहं प्राप्तुं स्वकीयं भोजनं वस्त्रादिकं आचरणादिकं वा त्यजति तदा सः पुनीतसङ्कल्पस्य धार्मिककर्मणः स्वरूपं धारयति । एवं प्रकारेण वृ इत्यस्माद्धातोः व्युत्पन्नो व्रतशब्दः श्रुतिपथभूतस्यार्थस्य समुपस्थापको भवति । यथा आदेशः, विधिः, आज्ञापालनम्, कर्तव्यता, धार्मिकता, नैतिकव्यवहारः, धार्मिकोपासना, आचरणम्, पुनीतव्यवहारः, गभीरसङ्कल्पः, स्वीकरणम् अथवा आचरणसम्बन्धी कश्चन सङ्कल्पः । ऋग्वेदप्रतिपादितव्रतशब्दस्यार्थः एतेषु एव सङ्घटितो भवति । अत्र ह्विटनी एवम् आप्टेप्रतिपादितस्यार्थस्य मतमतान्तरस्य वा ग्रहणं न सम्भवति । सारतः वक्तुं शक्यते यत् आप्टेप्रतिपादितस्य व्रतशब्दस्य व्युत्पत्तिःअनुचिता एव । महर्षियास्कप्रतिपादितस्य व्रतशब्दस्य पञ्चविंशतिशताब्दीतः पूर्वमेव प्रचलमानं सिद्धान्तं प्रायः सर्वैः सज्जनाः विद्वांसः स्वीकुर्वन्ति। तत्र वृधातुरेव आधारत्वेन स्वीकृतो विद्यते । अत्रैको नवीनो विषयः यत् यस्य समाजे महती प्रसिद्धिः विद्यते । ऋतशब्दः, व्रतशब्दः, तथा च धर्मन् शब्दः । ऋग्वेदे धर्मन् शब्दः क्वचित् पुँल्लिङ्गे विशेषणरूपेण तथा च क्वचित् नपुंसकलिङ्गे प्रयुक्तो दृश्यते ।

पितुं नु स्तोषं महो धर्माणं तविषीम्। यस्य त्रितो व्योजसा वृत्रं विपर्वमर्दयत्[1] ।।
इमं मस्त्यामुभयेऽकृण्वत धर्माणमग्निं विदथस्य साधनम्।

[1] ऋग्वेदः१.१८७.१

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अक्तुं न यह्वमुषसः पुरोहितं तनूनपातमरुषस्य निंसते ॥[१]
त्वे धर्माण आसते जुहूभिः सिञ्चतीरिव ।
कृष्णा रूपाण्यर्जुना वि वो मदे विश्वा अधि श्रियो धिषे विवक्षसे ॥[२]

त्वं धर्माण आसते इत्यत्र पुँल्लिङ्गे । अन्यस्थले नपुंसकलिङ्गे,अतो धर्माणि धारयन् ।

त्रीणि पदा वि चक्रमे विष्णुर्गोपा अदाभ्यः । अतो धर्माणि धारयन् ।।[३]
समिधानः सहस्रजिदग्ने धर्माणि पुष्यसि देवानां दूत उक्थ्यः ।।[४]
वृषा सोम द्युमाँ असि वृषा देव वृषव्रतः । वृषा धर्माणि दधिषे ।।[५]

एतेषु मन्त्रेषु धर्मस्यार्थः भवति धार्मिकं कर्म, यज्ञो वा । स्पष्टतः व्रतशब्दस्य योऽर्थः तस्य धर्मन् शब्दस्यार्थः सन्निकटार्थे ।

धर्माणि प्रथमान्यासन् ।।[६]
तानि धर्माणि प्रथमान्यासन् ।[७]
तानि धर्माणि प्रथमान्यासन् ।[८]

इत्यादिमन्त्रेषु यज्ञानां प्रथमा धर्मन् सञ्ज्ञा ।

समिध्यमानः प्रथमानु धर्मा।[९] मन्त्रे धर्मा इति ,
धर्माणि सनता न दूदुषत् ।[१०]

सनता धर्माणि । यत्र तत्र धर्मस्य वास्तविकार्थो नास्ति । यथा

---

[१] ऋग्वेदः १०.९२.२
[२] ऋग्वेदः १०.२१.३
[३] ऋग्वेदः १.२२.१८
[४] ऋग्वेदः५.२६.६
[५] ऋग्वेदः९.६४.१
[६] ऋग्वेदः१.१६४.४३
[७] ऋग्वेदः१.१६४.५०
[८] ऋग्वेदः १०.९०.१६
[९] ऋग्वेदः ३.१७.१
[१०] ऋग्वेदः ३.३.१

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कृणुते स्वाय धर्मणे ।[१]

धर्मणा मित्रावरुणा ।[२]

इत्यादिमन्त्रेषु निर्दिष्टनियमस्याचरणम् इत्यर्थः । क्वचित् क्वचित् धर्मस्यार्थो व्रतरूपेणापि निर्दिष्टमस्ति । यथा

अचित्ती यत् तव धर्मा युयोपिम मा नस्तस्मादेनसो देव रीरिषः ।[३]

इति मन्त्रे भक्तः प्रार्थयति भो वरुण ! यदा विमोहवशात् कर्मणि असावधानी जाता तदा भवान् मम कामपि हानिं मा करोतु ।

इन्द्र सोमं पिब ऋतुना ऽऽ त्वा विशन्त्विन्दवः । मत्सरासस्तदोकसः ।।[४]

ऋग्वेदस्य मन्त्रे -

घृतवती भुवनानामभिश्रियोर्वी पृथ्वी मधुदुघे सुपेशसा ।

द्यावापृथिवी वरुणस्य धर्मणा विष्कभिते अजरे भूरिरेतसा ।।[५]

हे द्युलोक ! तथा पृथिवीलोक ! भवान् जलयुक्तसुन्दररूपवान् सन् भुवनस्याश्रयदाता अस्ति । मधुरान्नस्य रसस्य च दाता, अमरबलवान् चास्ति । भवन्तौ उभावपि वरुणाधिकरणवन्तौ स्तः ।

इन्द्राग्नी युवं सु नः सहन्ता दासथो रयिम् ।

येन दृळहा समत्सु वीळु चित् साहिषीमह्यग्निर्वनेव वात इन्नभन्तामन्यके समे ।।[६]

इति मन्त्रे वर्णितमस्ति यत् स्वर्गस्य या निश्चयात्मिका स्थितिः सा वरुणदेवस्य व्रतेषु एकं व्रतमस्ति । ऋग्वैदिकमन्त्रेषु प्रयुक्तानां व्रतधर्मनादिशब्दानां समानार्थत्वं प्रतीयते । परन्तु तेषु एव एवं भूताः अपि मन्त्राः सन्ति येषां ऋतः, व्रतः, धर्मन् एतेषां

---

[१] ऋग्वेदः ४.५३.३
[२] ऋग्वेदः ५.६३.७
[३] ऋग्वेदः ७.८९.५
[४] ऋग्वेदः १.१५.१
[५] ऋग्वेदः ६.७०.१
[६] ऋग्वेदः ८.४०.१

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सामूहिकतया उपस्थितिर्न भवति अपितु क्वचिद् द्वयोः अर्थयोः क्वचित् त्रयाणामर्थाणां वा प्रतीतिर्जायते । ध्यातव्यमिदं यत् अथर्ववेदस्य ये अंशाः यस्य कृते पाश्चात्याः विद्वांसः वदन्ति यत् धर्मशब्दः धर्मनर्थे प्रयुक्तो विद्यते । यथा-

सूर्य चक्षुषा गच्छ वातमात्मना दिवं च गच्छ पृथिवीं च धर्मभिः ।
अपो वा गच्छ यदि तत्र ते हितमोषधीषु प्रति तिष्ठा शरीरैः ।।[१]

भगस्ते हस्तमग्रहीत् सविता हस्तमग्रहीत् ।
पत्नी त्वमसि धर्मणाहं गृहपतिस्तव ।।[२]

धर्मणा मित्रावरुणा विपश्चिता व्रता रक्षेथे असुरस्य मायया ।
ऋतेन विश्वं भुवनं वि राजथः सूर्यमा धत्थो दिवि चित्र्यं रथम् ।।[३]

भोः मेधाविन् ! मित्र ! वरुण ! भवन्तौ जगतः कल्याणार्थं वृष्ट्यादिकर्मणा यज्ञादिव्रतानां रक्षणं कुरुतः । जलप्रदातृमेघस्य सामर्थ्यात् यज्ञैः सम्पूर्णस्यास्य लोकस्य प्रकाशनं कुरुतः। भवन्तौ एव पूजनीयस्य सूर्यदेवस्यापि स्थापनमपि साधयतः ।

व्रतशब्दः तथा च धर्मन् शब्दः ऋग्वेदस्य नानामन्त्रेषु प्रयुक्तो विद्यते । यथा-

व्रतेन स्थो ध्रुवक्षेमा धर्मणा यातयज्जना । नि बर्हिषि सदतं सोमपीतये ।।[४]

यो वामृजवे क्रमणाय रोदसी मर्तो ददाश धिषणे स साधति ।
प्र प्रजाभिर्जायते धर्मणस्परि युवोः सिक्ता विषुरूपाणि सव्रता ।।[५]

ऋतस्य देवा अनु व्रता गुर्भुवत्परिष्टिद्यौर्न भूम ।
वर्धन्तीमापः पन्वा सुशिश्विमृतस्य योना गर्भे सुजातम् ।।[६]

---

[१] अथर्ववेदः १८.२.७
[२] अथर्ववेदः १४.१.५१
[३] ऋग्वेदः ५.६३.७
[४] ऋग्वेदः ५.७२.२
[५] ऋग्वेदः ६.७०.३
[६] ऋग्वेदः १.६५.३-४

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तिस्रो भूमीर्धारयन् त्रींरुत द्यून्त्रीणि व्रता विदथे अन्तरेषाम् ।
ऋतेनादित्या महि वो महित्वं तदर्यमन्वरुण मित्र चारु ।।[१]
दैव्या होतारा प्रथमा न्यृञ्जे सप्त पृक्षासः स्वधया मदन्ति ।
ऋतं शंसन्त ऋतमित्त आहुरनु व्रतं व्रतपा दीध्यानाः।।[२]
परिक्षिता पितरा पूर्वजावरी ऋतस्य योना क्षयतः समोकसा ।
द्यावापृथिवी वरुणाय सव्रते घृतवत् पयो महिषाय पिन्वतः।।[३]

विचाराचारसारसंसारे चित्तालोडनविलोडनप्रक्रमे निष्कर्षोऽयं यत् ऋततत्त्वं तादृशं तत्त्वं येन सम्पूर्णस्यास्य ब्रह्माण्डस्य व्यवस्थां सम्पादयति । यत् तत्त्वमतिप्राचीनकालादेव प्रवर्तमानमस्ति । व्रतस्य तात्पर्यमिदं यत् ते विधयः ये सर्वेषां देवानां व्यक्तीनां वा व्यक्तिगतरूपेण देवाः निर्धारिताः सन्ति । धर्मन् शब्दस्यार्थः धार्मिकं कृत्यं यज्ञो निर्दिष्टो नियमो वा । ऋतस्य या धारणा प्रायः लुप्तप्राया जाता । तथा च पृष्ठभूमौ विलुप्ता जाता । सत्यं जनाः आत्मसात् कृतवन्तः। धर्मन् व्यापकधारणावत् स्वीकृतो विद्यते । व्रततत्त्वस्य धारणा समाजस्य समग्रस्य अथवा प्रतिव्यक्तिजनस्य वा पुनीतसङ्कल्पानामाचरणसम्बन्धीनियमानां वा परिकल्पनावत् राजते । इति शम् ।

डॉ. सुधाकरमिश्रः
(सहायक आचार्यः व्याकरणविभागे)
श्रीसीतारामवैदिकादर्शसंस्कृतमहाविद्यालयः,
७/२, पी.डब्ल्यू.डी. रोड, कोलकाता-७०००३५

[१] ऋग्वेदः २.२७.८
[२] ऋग्वेदः ३.४.७
[३] ऋग्वेदः १०.६५.८

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अङ्क-२३
जनवरी-जून २०१४

वेदविद्या
ISSN-2230-8962

ऋग्वेदीयप्रथमसूक्तस्य सायणस्कन्दस्वामिभाष्ययोः काचित् सङ्क्षिप्ता तुलना

पियोली पालः

ऋग्वेदस्य प्रथमसूक्तम् अग्निदेवताकम्। सूक्तेऽस्मिन् नव मन्त्राः सन्ति। गायत्रीच्छन्दसा निबद्धेषु मन्त्रेष्वेतेषु अग्निदेवस्य स्तुतिः कृता अस्ति। ऋग्वेदस्य भाष्यकारेषु प्रसिद्धयोः भाष्यकारयोः श्रीसायणस्कन्दस्वामिनोः भाष्ययोः अवलम्बनेनं तुलनात्मकः कश्चित् प्रबन्धः इदानीं प्रस्तूयते। सायणाचार्यापेक्षया श्रीस्कन्दस्वामी परवर्त्तीभाष्यकारो भवतीति तदीयभाष्ये श्रीसायणाचार्येण प्रतिपादितमर्थमतिरिच्य केषुचित् स्थलेषु कश्चित् नूतनोऽर्थः श्रीस्कन्दस्वामिना स्वाभाविकतया प्रतिपादयितुं शक्य इति सम्भाव्यते। एतदर्थमेव अत्र प्रबन्धे कश्चित् प्रयासः।

'**अग्निमीळे पुरोहितम्**' इत्यादिप्रथममन्त्रे देवशब्दस्य दानादिगुणयुक्तोऽग्निरिति अर्थः सामान्यतः स्वीकृतः। श्रीस्कन्दस्वामिना तु श्रीसायणोक्तेनार्थेन सह अन्योऽपि अर्थः स्वभाष्ये प्रकाशितः। तन्मते पुरोहितशब्दो व्युत्पन्नशब्दः। अतः मन्त्रस्थस्य यज्ञस्येति पदस्य देवम् इत्यनेन पदेन सम्बन्धः। अतः यज्ञस्य देवम् इत्यर्थः श्रीस्कन्दस्वामिना स्वीकृतः। तथा च यज्ञस्य दाता दीपयिता वा अग्निरिति अर्थो भवति। अतएव श्रीस्कन्दस्वामिना उक्तम् - "**अथवा पुरोहितशब्दः क्रियाशब्दः। पूर्वस्यां दिशि निहितमाहवनीयात्मना स्थापितम् । यज्ञस्येत्येतत्तु देवमित्यनेनं सम्बध्यते। यज्ञस्य दातारं दीपयितारं वा। यज्ञं हि देवेभ्यो मनुष्येभ्यश्चाग्निर्ददाति, तदायत्तत्वात्। दीपयति च।**"

एवमेव मन्त्रस्थस्य होतृशब्दस्य व्याख्याप्रसङ्गे श्रीसायणाचार्येण होतृनामकऋत्विक् अग्निरिति स्वप्रतिपादितस्यार्थस्य दार्ढ्याय ऐतरेयब्राह्मणग्रन्थः उद्धृतः। श्रीस्कन्दस्वामी श्रीसायणोक्तमर्थमङ्गीकृत्यापि होतृशब्दस्य व्युत्पत्तिलभ्यम् आह्वातृरूपमर्थमपि स्वीकृतवान् । तथा चोक्तं श्रीस्कन्दस्वामिना - "अथवा

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ऋत्विग्घोतृशब्दावपि क्रियाशब्दावेव। ऋतावृतौ यष्टारम् ऋत्विजम्। यो यो यागकालस्तत्र तत्र यष्टारमित्यर्थः। होतारमाह्वातारम्।"

'अग्निः पूर्वेभिः' इत्यस्य द्वितीयमन्त्रस्य व्याख्याप्रसङ्गे श्रीस्कन्दस्वामिना कश्चिद्भिन्नः क्रमोऽनुसृतः यस्य चर्चा सायणभाष्ये न कृता। श्रीस्कन्दस्वामिनो मते **'अग्निः पूर्वेभिर्ऋषिभिरीड्यो नूतनैरुत'** इति पादद्वयम् एकं वाक्यम्। अवशिष्टश्च पादः **'स देवाँ एह वक्षति'** इति पृथग्वाक्यम्। अतः द्वितीयवाक्ये स्थितेन इह इति अव्ययेन न पूर्ववाक्यप्रसक्तस्य यज्ञस्य निर्देशः अपि तु कृत्स्नस्य जगतो निर्देशः। अतः 'स देवाँ एह वक्षति' इति वाक्यस्य स एव देवान् इह जगति आवहति इति शाब्दिकोऽर्थः। अर्थतश्च स देवान् यज्ञेषु आवहति नान्यः कश्चिदिति अर्थः फलति। श्रीसायणाचार्येण इह इति अव्ययस्य स्वीकृतो यज्ञरूपोऽर्थोऽपि श्रीस्कन्दस्वामिना वैकल्पिकतया अभ्युपगतः।

एवमेव **'अग्निना रयिमश्नवत्'** इत्यस्य तृतीयमन्त्रस्य व्याख्याप्रसङ्गे अग्निना इति हेतुतृतीया श्रीसायणाचार्येण अभ्युपगता। श्रीस्कन्दस्वामिना तु कर्त्तरि पञ्चम्यर्थे वा तृतीया अभ्युपगता। कर्त्तरि तृतीयास्वीकारप्रसङ्गे दत्तमिति पदमध्याहार्यमिति श्रीस्कन्दस्वामिनोऽभिप्रायः अर्थात् अग्निना रयिम् इत्यर्थः लभ्यते। अथवा अग्नेः सकाशात् रयिं प्राप्नोति इत्यपि अर्थः श्रीस्कन्दस्वामिना अभ्युपगतः।

मन्त्रस्थस्य पोषशब्दस्य व्याख्याप्रसङ्गे श्रीसायणाचार्येण प्रतिदिनं पुष्यमाणमेव धनम् इति अवधारणार्थकेन एव शब्देन सह पोषशब्दस्यार्थः कृतः। श्रीस्कन्दस्वामी तु पोषशब्दस्य एवशब्दस्य च श्रीसायणाभिप्रेतादर्थात् भिन्नतया अर्थः कृतः। तथा हि एवशब्दस्य समुच्चयः पोषशब्दस्य च पुष्टिरूपोऽर्थः कृतः। तथा चोक्तं तेन - "पोषमेव एवशब्दोऽवधारणासम्भवाच्चार्थे, पुष्टिं च।"

एवमेव यशश्शब्दस्यापि श्रीस्कन्दस्वामिना स्वातन्त्र्येण यशरूपोऽर्थः स्वीकृतः। यस्य विशेषणतया वीरवत्तमम् इति पदम् अन्वेति इति श्रीस्कन्दस्वामिनोऽभिप्रायः। श्रीसायणाचार्यस्तु रयेः एव विशेषणत्वेन यशसम् वीरवत्तमम् इति च पदद्वयं प्रयुक्तमिति स्वीकृतम्। तथा चोक्तं श्रीसायणाचार्येण -

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

"यशसम् दानादिना यशोयुक्तम् । वीरवत्तमम् अतिशयेन पुत्रभृत्यादिवीर-पुरुषोपेतम्। सति हि धने पुरुषाः सम्पद्यन्ते।"

अपि च चतुर्थमन्त्रस्यस्य अध्वरशब्दस्य श्रीसायणाचार्येण प्रकाशितमर्थं स्वीकृत्यापि श्रीस्कन्दस्वामी स्वानुरोधेन अर्थान्तरं प्रकाशयामास। उभाभ्यामपि भाष्यकाराभ्याम् अध्वरशब्दस्य राक्षसाधिकृतहिंसायाः अभावयुक्तो यज्ञः इत्यर्थः सामान्यतः कृतः। श्रीस्कन्दस्वामी तु यस्मिन् यज्ञकर्मणि हिंसायाः आचरणं नास्ति अपि तु सर्वेषामपि प्राणिनामनुग्रहः एव क्रियते स एव अध्वरो यज्ञः इति श्रीस्कन्दस्वामिनोऽभिप्रायः। पशुहिंसायुक्तो यज्ञोऽपि हिंसारहित एव अध्वरशब्दव्य-पदेश्य इति मतं स्थापयितुं श्रीस्कन्दस्वामिना स्वभाष्ये मनुवचनमपि प्रमाणत्वेन उपन्यस्तम्। तथा हि -

"अध्वरं अध्वरशब्दोऽयं यज्ञमित्यनेन पौनरुक्तत्वान्न यज्ञनाम। किं तर्हि ? तद्विशेषणम् । हिंसावचनो ध्वरतिः हिंसाकर्मा, ध्वरणं ध्वरो हिंसा यस्मिन् नास्ति सोऽध्वरः। यज्ञे हि सर्वस्यानुग्रहः, न हिंसा, येऽपि तत्र पश्वादयो हिंस्यन्ते तेषामप्यनुग्रहमेव शिष्टाः स्मरन्ति - ओषध्यः पशवो वृक्षास्तिर्यञ्चः पक्षिणस्तथा । यज्ञार्थं निधनं प्राप्ताः प्राप्नुवन्त्युच्छ्रितीः पुनः।"

अस्मिन्नेव मन्त्रे स्थितस्य परिभुशब्दस्य व्याख्या श्रीस्कन्दस्वामिना सामान्यतः पृथग्रूपेण कृता अस्ति। श्रीसायणाचार्येण परिभुशब्दस्य प्राप्त्यर्थकत्वं स्वीकृत्य परितः प्राप्तवान् अग्निः इत्यर्थः कृतः। श्रीस्कन्दस्वामी तु परिपूर्वकस्य भूधातोः स्वीकाररूपं परिग्रहात्मकमर्थं स्वीकृत्य व्याख्यानं कृतवान् अर्थात् अग्निः यं यज्ञं सर्वतोभावेन स्वीकरोति तमेव यज्ञं देवाः अपि स्वीकुर्वन्तीति तस्याभिप्रायः। तथा चोक्तं तेन -

"परिपूर्वो भवतिः सर्वत्र परिग्रहे। परिग्रही भवसि। स इदिति। इच्छब्द एवार्थे। स एव देवेषु गच्छति। देवास्तमेव परिगृह्णन्ति, नान्यमित्यर्थः।"

अग्निर्होता कविक्रतुः' इत्यत्र पञ्चमे मन्त्रे विद्यमानस्य चित्रश्रवस्तमः इति शब्दान्तर्गतस्य श्रवश्शब्दस्य कीर्त्तिरूपोऽर्थः श्रीसायणाचार्येण स्वीकृतः। श्रीस्कन्दस्वामी तु श्रवश्शब्दस्य कीर्त्या सह अन्नं धनञ्चेति अर्थद्वयमाधिक्येन

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्वीकृतवान्। किञ्च चित्रशब्दस्यापि शब्दशास्त्रीया व्युत्पत्तिः श्रीस्कन्दस्वामिना प्रदर्शिता। तथा चोक्तं तेन -

"चायृ पूजानिशमनयोरित्यस्य चित्रं पूजनीयम्। विचित्रपर्यायो वा चित्रशब्दः। श्रव इत्यन्ननाम वा धननाम वा कीर्त्तिपर्यायो वा। अतिशयेन पूज्यं विचित्रं वा अन्नादीनामन्यतमं यस्य स चित्रश्रवस्तमः।"

'यदङ्गदाशुषे त्वम्' इत्यस्मिन् मन्त्रे स्थितस्य अङ्गशब्दस्य निपातत्वे श्रीसायणस्कन्दस्वामिनोः मतभेदः नास्ति। परन्तु अङ्गशब्दस्यार्थः उभाभ्यामपि एताभ्यां भाष्यकाराभ्यां पृथक्त्या स्वीकृतः।श्रीसायणेन अङ्गशब्दस्य सम्बोधनार्थकत्वं स्वीकृतम् । श्रीस्कन्दस्वामिना तु अङ्गशब्दोऽयं पादपूरणार्थकः क्षिप्रार्थको वा स्वीकृतः।

अत्रैव प्रयुक्तस्य 'करिष्यसि' इति पदस्य व्याख्या उभाभ्यामपि भाष्यकाराभ्यां पृथक्तया कृता। श्रीसायणाचार्येण कृधातुः अत्र क्रियारूपं सामान्यमर्थं प्रकाशयति इत्युक्तम्। श्रीस्कन्दस्वामी तु कृधातोः दानार्थकता प्रतिपादिता। अस्यां व्याख्यायां दाशुषे इति चतुर्थ्यन्तं पदं सहायकमिति तस्याभिप्रायः। तथा चोक्तम् तत्र -

"करिष्यसि दाशुष इति सम्प्रदानचतुर्थीश्रुतेरिह करोतिः क्रियासामान्यवचनो दाने वर्त्तते। दास्यसीत्यर्थः।"

अपि च अस्यैव करिष्यसि इति शब्दस्य अन्तर्भावितसन्नर्थत्वमपि श्रीस्कन्दस्वामिना प्रतिपादितम्। लृट्लकारश्च लडर्थकः इति कारणात् करिष्यसि इति शब्दस्य चिकीर्षसि इत्यर्थः स्वीकृतः। तथा चोक्तं तेन -

"अथवा करिष्यसि इत्ययं करोतिरन्तर्णीतसनर्थो द्रष्टव्यः। लडर्थे लृट्। यद् यजमानाय भद्रं धनमन्नं वा चिकीर्षसि।"

अत्रैव मन्त्रे अङ्गिरश्शब्दस्य व्याख्याप्रसङ्गे श्रीसायणेन अङ्गिरोनामकस्य मुनेः हेतुत्वात् अग्निरपि अङ्गिरश्शब्दस्य गौणोऽर्थः। प्रसङ्गेऽस्मिन् श्रीस्कन्दस्वामिना अङ्गिरश्शब्दस्य साक्षात् अग्निरेवार्थः इति व्याख्यातम्। अङ्गिरश्शब्दस्य व्युत्पन्त्या अग्निमपि प्रतिपादयति। तथा चोक्तं तेन -

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

"अथवा गुणतोऽग्नेरिदमभिधानम्। अङ्गानि शरीरावयवा तद्वदङ्गि शरीरं, तस्य स्थितिहेतुः अशितपीतरसोऽङ्गिरसः, तं करोति अङ्गिरसयति। 'तत् करोति तदाचष्टे' (३/१/२६ वा.) इति णिच्। ण्यन्तात् क्विप्। हे अङ्गिरः। शरीरस्थितिहेतोरशित-पीतरसस्य कर्त्तरित्यर्थः। जाठरो ह्यग्निरन्नं रसीकरोति। रसो लोहितमांसस्नाय्वस्थिमज्जाशुक्रभावेन परिणममानः शरीरस्थितिहेतुर्भवति। "

'उपत्वाग्ने दिवेदिवे' इत्यस्मिन् मन्त्रे स्थितस्य दोषावस्तः इति प्रयोगस्य व्याख्याप्रसङ्गे श्रीसायणाचार्येण रात्रौ अहनि च इति अर्थः कृतः। स्वप्रतिपादितस्यार्थस्य उपपादनाय वस्तश्शब्दः अहर्वाची स्वीकृतः। तस्य च रात्रीशब्देन द्वन्द्वसमासः। श्रीस्कन्दस्वामी तु आच्छादनार्थकस्य वसधातोः निष्पन्नोऽयं वस्तश्शब्द इति स्वीकृतवान्। तन्मते दोषावस्तः इत्यस्मिन् शब्दे सप्तमीतत्पुरुषसमासः स्वीकर्त्तुं शक्यते । अतः दोषावस्तः इत्यस्यार्थः भवति रात्रिकालीनस्य तमसः आवरकः। तथा चोक्तं तेन -

"दोषेति रात्रिनाम। वस आच्छादने। रात्रौ स्वेन ज्योतिषा तमसामाच्छादयितः।"

एवमेव भरन्तः इत्यस्य पदस्य व्याख्याप्रसङ्गे श्रीसायणाचार्यः कस्यापि धातुविशेषस्योल्लेखम् अकृत्वा तत्र भृञ् धातुं स्वीकृतवान् इति कल्पयितुं शक्यते। स्कन्दस्वामी तु तत्र स्पष्टतया हृञ् धातुं स्वीकृत्य हकारस्य भकारम् उपपादितवान्। तथा चोक्तं तेन -

"भरन्तः हृञ् हरणे इत्येतस्यैवैतत् रूपम्। भत्वं 'हृग्रहोर्भच्छन्दसि' (३/१/८४ वा.) इति हस्य भः। हरन्तः प्रापयन्तः, स्तुतिं कुर्वन्त इत्यर्थः।"

'राजन्तमध्वराणाम्' इत्यस्मिन् मन्त्रे विद्यमानस्य राजन्तम् इति पदस्य व्याख्याप्रसङ्गे दीप्त्यर्थकं राज्-धातुम् आदाय दीप्यमानमित्यर्थः कृतः। श्रीस्कन्दस्वामी तु निघण्टोः आधारेण ऐश्वर्यकर्मार्थकं राजधातुमादाय राजन्तम् इत्यस्य ईशानमिति अर्थं कृतवान्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एवमेव ऋतस्य इति पदस्य व्याख्याप्रसङ्गे श्रीसायणेन अवश्यम्भाविनः कर्मफलस्येति अर्थः प्रतिपादितः। श्रीस्कन्दस्वामी तु ऋतशब्देन यज्ञरूपोऽर्थः स्वीकृतः। तथा चोक्तं तेन -

"ऋतस्य यज्ञस्यैव। ऋतशब्दो ह्यपठितोऽपि भूयिष्ठं यज्ञनाम दृश्यते।"

अपि च 'दीदिविम्' इति पदस्य श्रीसायणेन प्रकाशकरूपोऽर्थः स्वीकृतः। श्रीस्कन्दस्वामिना तु अतिशयेन दीप्तार्थकता स्वीकृतः।

अन्तिमस्य मन्त्रस्य व्याख्यायां श्रीसायणस्कन्दस्वामिनोः उल्लेखनीयः कोऽपि अर्थभेदो न परिलक्ष्यते।

यथा अन्येषां ग्रन्थानां व्याख्याकारेषूत्तरकालीनाः व्याख्याकाराः पूर्ववर्त्तिनां व्याख्याकाराणां मतानि अनुसरन्ति कदाचित् अन्यथा व्याख्यान्ति, आधिक्येन संयोजयन्ति कारणवशाच्च निरस्यन्ति, तथैव अत्रापि श्रीसायणस्कन्दस्वामिनोः भाष्ययोः तुलनायां वस्तुस्थितिः परिलक्ष्यते। श्रीस्कन्दस्वामी यद्यपि बहुषु स्थलेषु श्रीसायणाचार्यस्य मतात् भिन्नमतं प्रकाशितवान् तथापि क्वापि श्रीसायणाचार्यस्य नामोल्लेखपूर्वकं तन्मतस्य निरसनं न कृतवान्। अतः श्रीस्कन्दस्वामी श्रीसायणे अतीव श्रद्धापरायणः इति मन्यते।

पियोली पालः
जे.आर.एफ. विश्वभारती
शान्तिनिकेतनम्, (पश्चिमबङ्गालम्)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अङ्क-२३
जनवरी-जून २०१४

वेदविद्या
ISSN-2230-8962

अथर्ववेदीय वाङ्मय की श्रीवृद्धि में पाश्चात्यविद्वानों का योगदान

प्रो. रूप किशोर शास्त्री

वैदिकसाहित्य एवं संस्कृतभाषा ने भारतीय मनीषा, संस्कृति, सभ्यता, ज्ञान एवम् अध्यात्म की उदात्तता का दर्शन जो विश्व के लिए दिया है, यह अपने में विश्व-पटल पर कौतूहल एवं परम जिज्ञासा का विषय है तथा गत दो-तीन शताब्दियों में अत्यधिक चर्चा, अध्ययन एवम् अनुसन्धान का विषय रहा है। वस्तुतः योरोपीय बुद्धिजीवियों को अत्यन्त आन्दोलित किया है उक्त साहित्य एवं भाषा ने, जिसने विश्व के अनेक देशों को विशेषकर भारतीय तथा योरोपीय देशों को एक भाषापरिवारीय सम्बन्धी बनने का मार्ग प्रशस्त किया, परिणामतः 'वसुधैव कुटुम्बकम्' का लक्ष्य सच्चे अर्थों में इसीसे प्राप्य हो सकता है।

वैदेशिक विशेषकर योरोपदेशीय लोगों को सर्वप्रथम संस्कृतभाषा से परिचित कराने का श्रेय यद्यपि अट्ठारहवीं शताब्दी के सातवें दशक में फोर्ट विलियम में नियुक्त मुख्य न्यायाधीश सर विलियम जोन्स को जाता है, जिन्होंने हिन्दुओं के सम्पत्ति एवं परिवार सम्बन्धी वादों एवं विवादों का स्मृतियों व धर्मशास्त्रों के आधार पर न्याय करने की उत्कट अभिलाषा के वशीभूत बड़े ही परिश्रम, श्रद्धा एवं सतत निष्ठा व लगन के साथ संस्कृत पढ़कर अपनी रुचि को संस्कृत-वैदुष्य में परिवर्तित किया। वे यहीं नहीं रुके, बल्कि उन्होंने स्थायी एवं विकसित मूर्त-रूप देने की दृष्टि से १७८३ को भारतीय प्राच्यविद्यानुसन्धान के निमित्त रायल एशियाटिक सोसाइटी की स्थापना करके भारतीय प्राच्य-विद्याओं के प्रति अपना हार्दिकभाव व आदर प्रस्तुत किया। सोसाइटी की स्थापना के अवसर पर अपने उद्घाटन-भाषण में संस्कृत की महनीय कीर्ति को जोन्स ने इन शब्दों में अभिव्यक्त किया -"संस्कृत की प्राचीनता का निश्चित

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ज्ञान भले ही हमें न हो किन्तु इसकी संरचना आश्चर्यजनक है, जो ग्रीक से पूर्ण, लैटिन से अधिक विशद तथा इन दोनों से परिपूर्ण, परिष्कृत एवं परिमार्जित है।[१]

सर विलियम जोन्स के संस्कृत, ग्रीक, लैटिन, गाथी एवं केल्टिन भाषाओं के तुलनात्मक व विश्लेषणपरक तत्कालीन योरोपीय जर्नल्स में प्रकाशित कतिपय लेखों ने योरोपवासियों का ध्यान क्या आकृष्ट किया, उन्होंने तो संस्कृताध्ययन एवं भाषाविज्ञान के क्षेत्र में क्रान्ति मचा दी। परिणामतः योरोपीय संस्कृतप्रेमियों का संस्कृताध्ययन की प्रस्थापनानन्तर प्राच्य भारतीय शास्त्रों के प्रति आकर्षण अत्यन्त द्रुतगति से व्यापक हुआ। यूरोप के देशों में अपेक्षाकृत जर्मनी में संस्कृत का अनुराग अत्यधिक प्रचलित हुआ एवं भारतीय प्राच्यविद्या सम्बन्धी विभिन्न क्षेत्रों में व्यापक उन्नतकोटि का कार्य हुआ। यद्यपि सर विलियम जोन्स से पूर्व हेनरिख रॉथ (१६२०-१६६८), बार्थो लोमियस जीजेंवल्ग (१६८२-१७१९), एन्क्विटल डुपेरों (१७३१-१८०५) एवं कोएर्डू (१७२८-१७९७) इत्यादि संस्कृत-विद्वान् हो चुके थे, जिन्होंने संस्कृताध्ययन, उपनिषदों एवं भाषाविज्ञान को अपना प्रिय विषय बनाया था, इन्होंने यूरोप में संस्कृताध्ययन की स्थापना करके अपने को पूर्णतः समर्पित कर दिया था। वस्तुतः सत्रहवीं शताब्दी से ही संस्कृतभाषा ने अपने वैभव एवं चमत्कार की पताका योरोप के क्षितिज में फहरा दी थी, परन्तु सर विलियम जोन्स द्वारा रायल एशियाटिक सोसाइटी की स्थापना के अनन्तर संस्कृताध्ययन को जो विराट् आयाम मिला उससे यूरोप में संस्कृत एवं वैदिकसाहित्य का तुलनात्मक-अध्ययन, पाण्डुलिपियों तथा दुर्लभ ग्रन्थों का संशोधन व पाठालोचनपूर्वक प्रकाशन, शोध एवम् अनुवादों में प्रगति हुई, फलतः हिन्दू लॉ, स्मृतियों, भारतीय दर्शन, उपनिषद्, धर्म, दर्शन, संस्कृति, ज्योतिष, गणित, व्याकरण व भाषाविज्ञान पर गहनता से

---

१ The sanskrit language whatever its antiquity, is of wonderful structure, more perfect than Greek, more copious than latin and more complitly refined than either.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रस्तुति होने लगी । सर विलियम जोन्स से ही प्रेरणा लेकर हेनरी टॉमस कोलब्रुक ने संस्कृताध्ययन का क्षेत्र विस्तृत कर दिया था, जिसमें उसके द्वारा यूरोपवासियों को संहिताओं से परिचय कराना विशिष्ट रहा। इसके अतिरिक्त हितोपदेश, किरातार्जुनीयम्, पाणिनिव्याकरण एवम् अमरकोश का सम्पादन प्रमुख था। प्राचीन संस्कृत-पाण्डुलिपियों का सङ्ग्रह, संरक्षण एवम् उनके उपयोग तथा प्रक्रिया की बड़े परिश्रमपूर्वक प्रस्तुति कर इन्होंने मार्गप्रशस्त किया था। हेनरी द्वारा कृत हजारों पाण्डुलिपियों का सङ्ग्रह आज भी इंग्लैण्ड की इण्डिया ऑफिस लाईब्रेरी की प्रतिष्ठा को बढ़ा रहा है।

सत्रहवीं-अठारहवीं शताब्दी में यूरोप के इंग्लैण्ड एवं पुर्तगाल देश से बड़ी सङ्ख्या में गोरे लोग व्यापार की दृष्टि से भारत में आये और यहाँ की भाषा, संस्कृति, सभ्यता, साहित्य, धर्म, दर्शन से भी परिचित हुए। लेकिन उस समय स्विटजरलैण्ड, आस्ट्रिया और जर्मनी कभी भी भारत में उपनिवेश बनाने के इच्छुक नहीं रहे, जबकि इन देशों के कतिपय मनीषी विद्वानों ने प्राच्यविद्यागत एक बड़ा योगदान दिया है। यह सत्य है कि यूरोपीय देशों के विद्वान् अधिकांशतः ईसाई मिशनरी भावना से परिपूरित थे, परन्तु अधिकतर विद्वानों के विद्वान् के हृदय एवं चिन्तन में निस्सन्देह वैदिक एवं लौकिक-साहित्य के उदात्त ज्ञान, भाषावैज्ञानिक सटीकता, शाश्वतसिद्धान्तता एवं समस्त काव्यगत विधाओं के सौन्दर्य ने परिवर्तन करने के लिए बाध्य कर दिया। समस्त भारतीयों को गर्व करना चाहिये कि हमारे वेदों तथा पूर्वजों, ऋषियों, मुनियों एवम् आचार्यों द्वारा रचित ग्रन्थों के प्रति योरोपवासियों का इतना अनुराग बढ़ा, जिसके कारण आज विश्व में भारतवर्ष, भारतीय धर्म-दर्शन-संस्कृति व सभ्यता एवं ज्ञान का विशिष्ट सम्मान है। इन विद्वानों ने वैदिक एवं लौकिक वाङ्मय की समस्त विधाओं पर शोधपरक एवम् उच्चस्तरीय कार्य किया है, जिसमें उन्होंने दुर्लभ ग्रन्थों का प्रकाशन, वेदों का भाष्य, सम्पादन, कोष-निर्माण, समस्त वैदिकवाङ्मय, पुराणों, महाकाव्यों, बौद्ध-जैन ग्रन्थों, भाषाविज्ञान, धर्मशास्त्रों, अर्थशास्त्र, शिल्पविद्या, विधि, इतिहास, कला, सङ्गीत, साहित्य इत्यादि पर अद्भुत कार्य किया है, निश्चय ही इन

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विद्वानों ने वैदिक ग्रन्थों के विशुद्ध-रूप से प्रकाशन एवं संरक्षण में जिस भूमिका का निर्वहण किया है उससे वे सदा श्रद्धेय एवं हम लोग उनके आभारी रहेंगे। वस्तुतः उनके कृत कार्यों का विवरण एवं लेखा-जोखा अत्यन्त विस्तृत एवं समृद्ध है।

समस्त वैदिक एवं लौकिक-साहित्य के अन्तर्गत उक्त यूरोपीय एवम् अन्य वैदेशिक विद्वानों ने अथर्ववेदीय वाङ्मय पर भी अत्यन्त प्रशंसनीय कार्य किया है, जिसका उल्लेख करना सुतराम् अपेक्षित है। इस सम्बन्ध में सर्वप्रथम उल्लेखनीय कार्य है **आटो वॉन बोथालिंक** (१८१५-१९०४) का। इस दीर्घजीवी व्याकरण एवं वैदिक विद्वान् ने अथर्ववेदसंहिता पर कार्य किया, जिसका ९० प्रतिशत भाग स्वयं बॉथलिङ्क ने तैयार किया तथा १० प्रतिशत कार्य के रूप में योगदान है **डब्ल्यू. डी. ह्विटनी** का, जो स्वयं वैदिकवाङ्मय का प्रसिद्ध विद्वान् रहा है। ह्विटनी ने इसकी शब्दसूची तैयार करने में श्रमसाध्य योगदान दिया है। वैसे इस जर्मनदेशीय विद्वान् बॉथलिङ्क ने पाणिनीयव्याकरण, उपनिषद् एवं संस्कृतनाटकों पर उच्चस्तरीय कार्य किया है, जो प्रायः जर्मनभाषा में प्रकाशित है। इसके द्वारा कृत कार्यों में **पाणिनिज अख्त ब्यूशेर ग्रामाटिशेर रिगेन** (Panini's acht Buecher Grammatischer Regeln); (Panini's eight looks of Grammitical rules) प्रमुख हैं। वहीं इसने धातुपाठ एवं पाणिनि की शब्दसूची भी तैयार की। बॉथलिङ्क का मत था कि पाणिनि, कात्यायन एवं पतञ्जलि का समय क्रमशः ३५०, २५० और १५० ईसापूर्व है; भले ही हम लोगों अथवा अन्य विद्वानों की सहमति ना हो। इसका एक और प्रशंसनीय कार्य था उणादिसूत्रों पर इन्हीं उणादिसूत्रों पर उपलब्ध समस्त वृत्तिकारों द्वारा कृत कार्य सम्बन्धी अत्यन्त उपयोगी एक ग्रन्थ इसी लेख के लेखक तथा महर्षि सान्दीपनि राष्ट्रिय वेदविद्या के सचिव प्रो. रूप किशोर शास्त्री का प्रतिष्ठान द्वारा २०१४ में प्रकाशित किया है पर, जिस पर उणादिसूत्रों में आगमों विषयक जर्मन भाषा में Die Unadi Affixe (The unadi affixes) के नाम से प्रसिद्ध है। इसने शाकुन्तलम् १८४२, मृच्छकटिकम् १८७७, छान्दोग्योपनिषद् १८८९ और दण्डी का

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

काव्यादर्श १८९० में जर्मन अनुवादसहित प्रकाशित किया जो अपने में एक विशिष्ट कार्य था।

जर्मन के ही दो विद्वान् डब्ल्यू. डी. ह्विटनी और रुडोल्फ वॉन रॉथ ने सम्मिलित रूप से बर्लिन में १८५६ में अथर्ववेदसंहिता को दो भागों में प्रकाशित किया। रॉथ के पास अथर्ववेदसंहिता की जो पाण्डुलिपि थी, वह जीर्ण-शीर्ण एवम् अस्तव्यस्तावस्था में थी, उसने बड़े ही परिश्रम के साथ पूर्णतः व्यवस्थित की। रॉथ ने सुना था कि कश्मीरीब्राह्मण किसी अथर्ववेदीय-शाखा से अपने को सम्बद्ध मानते हैं, वह कश्मीरीब्राह्मणों की प्रकृति से आशान्वित था कि उसे संहिता की पाण्डुलिपि उनसे अवश्य मिल जायेगी। महाराजा कश्मीर ने रॉथ की उत्कट अभिलाषा को पूरा करने के उद्देश्य से उसे भोजपत्रों पर लिखित अथर्ववेद की पाण्डुलिपि भेंट की जो आज भी जर्मनी के ट्यूविंगन पुस्तकालय में सुरक्षित रखी है। रॉथ की प्रसन्नता का कोई ठिकाना नहीं था, फलतः उसने अपने दो प्रतिभाशाली विद्वान् शिष्यों एम. ब्लूमफील्ड और आर. गर्बे के साथ मिलकर पैप्पलादशाखा की अथर्वसंहिता की पाण्डुलिपि की ५४४ रङ्गीन प्लेटें ट्यूबिंगन विश्वविद्यालय के पुस्तकालय से तैयार करके १९०१ में स्टुटगार्ड में प्रकाशित की। प्रो. ब्लूमफील्ड ने भी काश्मीर की शारदालिपि में प्राप्त एक पाण्डुलिपि के आधार पर १९०१ में अँग्रेजी अनुवाद के साथ अथर्ववेदसंहिता को प्रकाशित किया था।

जुलियस जौली (१८४९-१९३२) नामक विद्वान् ने भारतीयचिकित्सा के क्षेत्र में उच्चस्तरीय कार्य किया है उसने **एन्साइक्लोपीडिया ऑफ इण्डो-आर्यन् रिसर्च** नामक ग्रन्थ के प्रथम अध्याय में चिकित्सा सम्बन्धी प्रस्तुति अथर्ववेद की अनेक ऋचाओं एवम् अथर्ववेद के सूत्रग्रन्थ कौशिकसूत्र के आधार पर उदात्त चिन्तन के साथ की है। मर्बर्ग और म्यूंखेन विश्वविद्यालय में रहे संस्कृत के प्रो. हेन्स ऑर्टेल ने जहाँ यास्क के निरुक्त, जैमिनीयपूर्वमीमांसा, शङ्कराचार्य द्वारा कृत वेदान्तसूत्र के भाष्य और कपिष्ठलसंहिता पर शोधपरक कार्य किया, वहीं उन्होंने जर्मनभाषा में जु देन वर्ङ्गटेलुंगस्वेरियन्टेन देर मन्त्रास देर्स अथर्ववेद इन देर शौनक उण्ड पैप्पलाद

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

रिजेन्शान उण्ड देस सामवेद इन देर कौथुम उण्ड जैमिनीय रिलेन्शान (Zu den wortstellungsrianten der Mantras des Atharvaveda in der Shaunaka und Paippalada rezension und des Samveda in der Kauthuma und Jaiminiya rezension) (On the variation in order of words in the mantras of the Atharvaveda in the Shaunak and Pappalad recension and the Samveda in the Samveda in the Kauthuma and Jaiminiya recension) नामक शोधकार्य १९३८ में प्रकाशित किया, जिसमें उसने अथर्ववेद की शौनक एवं पैप्पलाद-शाखा तथा सामवेद की कौथुम तथा जैमिनीय-शाखा के क्रम-वैभिन्य पर विशद विश्लेषण किया है।

जर्मनी देश के छोटे से शहर में जन्मे एक मेधावी विद्वान् प्रो. जुलियस वॉन निगेलियन (१८७२-१९३२) की अथर्ववेद एवं भारत के सांस्कृतिक इतिहास के क्षेत्र में विशेषज्ञ के रूप में प्रसिद्धि रही है। उसने भारतीय आस्थाओं एवम् अन्धविश्वासों पर बहुत कार्य किया है। वैसे प्रो. निगेलियन का प्रारम्भिक प्रकाशन कार्य भाषाविज्ञान के क्षेत्र में रहा है, परन्तु निगेलियन के अध्यापक रहे प्रो. अल्ब्रेख्त वेबर की प्रेरणा से निगेलियन ने अथर्ववेद के परिशिष्ट को बड़े ही परिश्रमपूर्वक शोधकार्य करके १८९८ में प्रकाशित किया है। वह इतने से सन्तुष्ट नहीं था क्योंकि उसका विचार था कि इस दुरूह कार्य करने से पूर्व भारत की सांस्कृतिक-सम्पदा के इतिहास को गहराई से जानने की थी। अतः उसने दोनों बातों को लक्ष्यीकृत करते हुए जर्मनभाषा में **जुर् रिलीजन्सगेसिस्टे इण्डियन्स : डी अथर्वपरिशिष्ट** (Zur Religiongeschichte Indiens: Die Atharvaparishist) (On the history of religion in India: The Atharvaparishist) नामक शोधकार्य १९०८ में प्रकाशित किया। उसका शोधकार्य और आयाम लेता गया, फलतः उसने १९०९-१० में एक अमेरिकन विद्वान् जी.एम. बोलिंग के साथ मिलकर अँग्रेजी में The Parishistas of the Atharvaveda नामक ग्रन्थ प्रकाशित किया। निगेलियन ने अन्य विषयों

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पर भी अपनी लेखनी से भारतीय प्राच्यविद्याओं पर लिखा है परन्तु उसने अथर्ववेद पर लिखना नहीं छोडा, उसका एक अन्य महत्त्वपूर्ण कार्य **जर्नल्स ऑफ द अमेरिकन ऑरियन्टल सोसाइटी** में १९१३ और १९१५ में प्रकाशित हुआ, जिसकी विषयवस्तु थी Indian Expiatory Ceremonies. वस्तुतः यह कार्य था प्रायश्चित्त सम्बन्धी प्रक्रियाओं पर। वहुआयामी व्यक्तित्त्व के धनी निगेलियन का मानना था कि प्रायश्चित्तविधान मूलतः अथर्ववेदीय अवधारणा है, जिसका विस्तार वाद में गृह्यसूत्रों, स्मृतियों एवं धर्मशास्त्रों में हुआ है। उसकी दृष्टि में प्रायश्चित्त-अवधारणा भारतीयों की अद्भुत सामाजिक एवम् आत्मिक सुधारात्मक प्रक्रिया एवं संस्कार था, जिससे पुनः सामाजिक प्रतिष्ठा-प्राप्ति के साथ-साथ आत्मिक उत्थान एवं सुधार होता था और सभी दोषों, अपराधों एवं त्रुटियों से भविष्य में बचा जा सकता था।

ज्यूरिख विश्वविद्यालय में रहे प्रोफेसर पॉल होर्स्वे (१९१५-१९७१) जर्मनी के ऐसे विद्वान् हुए हैं जिन्होंने दर्शन, वौद्ध-अध्ययन एवं वैदिकसाहित्य के विषयों पर वडी गम्भीरता से शोधपरक कार्य एवं प्रकाशन किया है। इन्होंने जर्मनभाषा में वोम सोफंगस्मिथोस जुम वेल्टगेसेट्ज़ Vom schaepfungemgthas zum veltgesty (Vom the myth of Geation to cosmic order) नामक प्रकाशन में अथर्ववेदविषयक लेख लिखे हैं। २१ खण्डों में जर्मन भाषा में Asiatische studiean ऐशियाटिक स्टडीयन नामक प्रकाशन में उन्हें बहुत ख्याति मिली, जिसमें ऋग्वेद, अथर्ववेद, ब्राह्मणग्रन्थों, उपनिषदों एवं वौद्ध-अध्ययन पर १९५५, ५६, ५८ में शोधलेख प्रस्तुत किये हैं।

पोलैण्ड में यद्यपि संस्कृताध्ययन को जर्मनी, फ्रांस, इंग्लैण्ड, इटली इत्यादि देशों की तुलना में उतना आयाम न मिला हो, परन्तु गत अनेक दशकों में प्राच्यं भारतीय वाङ्मय पर अध्ययन एवं शोधकार्य में वृद्धि हुई है। वर्तमान में अन्ताराष्ट्रिय ख्याति के संस्कृतविद्वान् हैं प्रो. एम. क्रेजिस्टोफ ब्रिस्की प्रो. ब्रिस्की, इस लेख के लेखक प्रो. रूप किशोर शास्त्री के अच्छे मित्र हैं, स्वयं प्रो. शास्त्री ने इनके अनेक व्याख्यान वेद विभाग, गुरुकुल काङ्गड़ी विश्वविद्यालय हरिद्वार (उत्तराखण्ड) में

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कराये हैं । जो भारत में पोलैण्ड के राजदूत भी रह चुके हैं, ने उल्लेख किया है कि क्रेकोवा (पोलैण्ड) की एक विदुषी ने पोलिस भाषा में Athravaveda-Wybrane hymny (Atharvaveda-Selected hymns) पर एक शोधपरक कार्य ऑफिसियाना लिटरेका क्रेकोवा से १९९९ में प्रकाशित हुआ है, इटली में वैदिक एवं संस्कृतसाहित्य सम्बन्धी अध्ययन-अध्यापन एवं शोधकार्य उन्नीसवीं शताब्दी से ही आज तक वहाँ के विश्वविद्यालयों एवं संस्थानों में निरन्तर चला आ रहा है। यद्यपि अथर्ववेद पर उतना कार्य वहाँ नहीं हुआ है जितना ऋग्वेद, स्मृतियों, अर्थशास्त्र आदि ग्रन्थों पर.....। लेकिन संस्कृतग्रन्थों एवं रामायण इत्यादि पर हुआ है। इटली के विद्वानों में डॉ. डेनियल मागी ने Antico-Indiano Ksetra-nel Rigveda e nel Atharvaveda (एण्टीको-इण्डियन क्षेत्र-नेल ऋग्वेद इ.नेल अथर्ववेद) नामक विश्लेषणात्मक शोधकार्य इन्स्टीटूटि एडिटोरिबलि इ पोलिग्राफिसी इन्टरनेजनली १९९८ में प्रकाशित हुआ है। इधर एशियाई देश थाईलैण्ड के दो विद्वानों के शोधग्रन्थों ने अथर्ववेदीय वाङ्मय प्रकाशन में श्रीवृद्धि की है। डॉ. पी. वान्चाई किंग्केव का ए क्रिटिकल स्टडी ऑफ द अथर्ववेद (XI-XV काण्ड) और डॉ. पी. देवन दुसाडी-अरक का ए क्रिटिकल स्टडी ऑफ द अथर्ववेद (XVI-XX काण्ड) १९९२ में प्रकाशित हुए हैं।

यद्यपि भारत की दृष्टि सें विदेशों में अथर्ववेद सम्बन्धी वाङ्मय पर कृत अध्ययन, शोध एवं प्रकाशनकार्य में न्यूनता प्रतीत होती हो, परन्तु वैदिशिक धरा पर उक्त कृत-कार्य स्वयं में एक मील का पत्थर है जो देश-विदेश के विद्वानों के लिए सतत प्रेरणास्पद बना रहेगा।

प्रो. रूप किशोर शास्त्री
सचिव
महर्षि सान्दीपनि राष्ट्रीय वेदविद्या प्रतिष्ठान
वेदविद्या मार्ग, चिन्तामण गणेश, उज्जैन-४५६००६ (म.प्र.)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अङ्क-२३
जनवरी-जून २०१४

वेदविद्या
ISSN-2230-8962

अथर्ववेदोक्त इष्टापूर्त्तकर्मफल

डॉ. सदानन्द त्रिपाठी

अथर्ववेदनिर्दिष्टमिष्टापूर्त्तं तु कर्म्म यत्।
तत्फलञ्च समासेन शोधपत्रेऽत्र वर्ण्यते॥

